न पुत्रो मित्रं वा भवति न कलत्रं न सुजनः ।
न पत्नीवित्तं वा बहुभिरथवा किं प्रलपितैः
सहायः संसारे [विमल]जिनधर्मः परमिह ॥३१॥

પ્રત્યેક ધર્મ અને ખાસ કરીને જૈન ધર્મ જે ગુણો પર વિશેષ ભાર મૂકે છે, તે ગુણોની ધર્મમાં આવશ્યકતા દર્શાવી છે.

यथा चतुर्भिः कनकं परीक्ष्यते निर्घर्षणच्छेदनतापताडनैः ।
तथैव धर्मो विदुषा परीक्ष्यते श्रुतेन शीलेन तपोदयागुणैः ॥६१॥

આ સંગ્રહના કર્તાનો સર્વધર્મસમભાવ નીચેના શ્લોકમાં સરસ રીતે વ્યક્ત થાય છે.

अर्हन् हरो हरिरनादिरनाहतश्च
बुद्धो बुधो निरवधिर्विधिरव्ययश्च ।
इत्याद्यनेकविधनिर्मलनामधेयं
शुद्धाशयः परमहंसमहं नमामि ॥२४॥

મનુષ્યો રસ્તામાં ચાલતા આગળ મારો નિર્વાહ કેમ થશે એની ચિંતા કરે છે, પણ સંસાર નામના નિઃસીમ માર્ગમાં આગળની ચિંતા કર્યા વગર, નિરાંતે ચાલે છે.

मार्गे लोकः कति[पय]पदक्षेपसाध्ये पुरस्तात्
निर्वाहो मे कथमिति भवेच्चिन्तया व्यग्रचितः ।
संसाराख्ये पुनरिह पथि प्रत्यहं लङ्घनीये
निःसीमेऽस्मिन् किमिति कुधियः सुस्थिताः सञ्चरन्ति ॥३२॥

આ સંગ્રહમાં મોટાભાગનાં સુભાષિતો ઉપદેશપરક છે. મેઘને લગતી અન્યોક્તિ દર્શાવતું એક સુંદર સુભાષિત પણ મળે છે.

यत्कृष्णानि दिशां मुखानि तनुषे यद्गर्जसि प्रोषित-
स्त्रीचेतांसि दधासि यद्भयभरं भूयस्तडिद्विभ्रमैः ।
एतद् वारिद ! बाह्यमेव भवतां मध्ये तु नैसर्गिकं
तत्पुष्यत्यमृतं यदत्र जगतां जीवातवे जायते ॥२८॥

ટૂંકમાં કહીએ તો, આ સંગ્રહમાં મળતાં સુભાષિતોમાં, ખાસ તો નીચેના વિષયો પર વિચારો રજૂ થયા છે : સજ્જન મનુષ્યોનું ચારિત્ર્ય, સદ્‌ગુણોની સમજ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અને તેમનું મહત્ત્વ, દુર્જનનાં લક્ષણો, કર્મના સિદ્ધાંતનો નિર્દેશ, સત્કર્મનું મહત્ત્વ, જૈન ધર્મનું મહત્ત્વ, સદ્‌ગુરુનાં લક્ષણો વગેરે.

એ સ્પષ્ટ છે કે સંગ્રાહકે બીજા સુભાષિત સંગ્રહોમાંથી શ્લોકો પસંદ કરીને આ સંગ્રહ તૈયાર કર્યો છે, પણ તેમણે સુભાષિતોને જરાય વ્યવસ્થિત ગોઠવ્યાં નથી, જેમકે પ્રણયની ભાવનાને વ્યક્ત કરતા શ્લોકો (૯-૧૧) પછી ચંદ્રને લગતા અન્યોક્તિના શ્લોકો આવે છે, તે જ પ્રમાણે વૈરાગ્યમૂલક શ્લોકો (૨૫-૨૭) પછી વાદળને લગતો શ્લોક આવે છે. આ સંગ્રહમાં બંને શ્લોકને (૫૮, ૫૯)૫૮ નંબર આપ્યો છે. જેથી હસ્તપ્રતમાં છેલ્લા શ્લોકનો નંબર ૬૮ છે, પણ ખરેખર ૬૯ શ્લોકો છે તે છેલ્લા શ્લોક પછી ચાર ઝાંખા અક્ષરથી પછીનો શ્લોક શરૂ થાય છે. પણ તે અધૂરો રહ્યો છે.

આ સંગ્રહના મોટાભાગના શ્લોકો પ્રાચીન સુભાષિતસંગ્રહોમાં જોવા મળ્યા નથી, છતાં જે શ્લોકો તે સંગ્રહોમાં મળ્યા છે તે શ્લોકાનુક્રમણિકા સાથે દર્શાવ્યા છે.

આ લઘુસંગ્રહના કેટલાક શ્લોકોમાં રજૂ થયેલા ઉમદા અને પ્રેરક વિચારોને લીધે આ નાનો સુભાષિતસંગ્રહ પણ નોંધપાત્ર બની રહે છે. આ સુભાષિતોમાંના મોટાભાગનો છંદ અનુષ્ટુપ છે, જ્યારે બાકીના સુભાષિતોનો છંદ આર્યા શિખરિણી, શાર્દૂલવિક્રીડિત વગેરે છે, જેનો ખ્યાલ આ સંગ્રહને અંતે આપેલી છંદોની સૂચિ પરથી આવશે.

૧૮, સ્વૈરવિહાર સોસાયટી,
પાંજરાપોળ ચાર રસ્તા પાસે,
અટીરા રોડ, અમદાવાદ-૧૫
ફોન : ૨૬૩૦૦૦૭૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# संक्षेपसूची

| | |
|---|---|
| नीति. | भर्तृहरिरचितं नीतिशतकम् |
| वैराग्य. | भर्तृहरिरचितं वैराग्यशतकम् |
| शा.प. | शार्ङ्गधरसंगृहीता शार्ङ्गधरपद्धतिः |
| शृंगार. | भर्तृहरिरचितं शृंगारशतकम् |
| स.क. | श्रीधरदाससंगृहीतं सदुक्तिकर्णामृतम् |
| सु.को. | विद्याधरसंगृहीतः सुभाषितरत्नकोशः |
| सु.व. | वल्लभदेवसंगृहीता सुभाषितावलिः |
| सू.मु. | जल्हणसंगृहीता सूक्तिमुक्तावलिः |
| सू.र.को. | लक्ष्मणसंगृहीतः सूक्तिरत्नकोशः |
| सू.र.हा. | सूर्यकलिङ्गराजसंगृहीतः सूक्तिरत्नहारः |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सूक्तावली

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## विषयानुक्रमणिका


| | विषय | श्लोकाङ्कः | श्लोकसंख्या |
|---|---|---|---|
| १. | धर्माधिकारः | १-१०४ | १०४ |
| २. | कामाधिकारः | | |
| | मेघः | १०५-१०७ | ३ |
| | सिंहः | १०८-१०९ | २ |
| | हंसः | ११०-११२ | ३ |
| | गजः | ११३-११४ | २ |
| | चूतः | ११५-११९ | ५ |
| | शङ्खः | १२०-१२१ | २ |
| | आकाशः | १२२-१२३ | २ |
| | विहंगाः | १२४-१२५ | २ |
| | सर्प : | १२६ | १ |
| | द्रुमाः | १२७-१२९ | ३ |
| | सरः | १३०-१३१ | २ |
| | मुक्तकम् | १३२-१३८ | ७ |
| | सिंहः | १३९-१४७ | ९ |
| | | | १४७ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सूक्तावली

ॐ नमो वीतरागाय ।

धर्माधिकारः -

१. मानुष्या-ऽऽर्यक्षेत्र-देशा-ऽन्वया-ऽऽयुर्नीरोगत्वाऽऽचार्य-बुद्ध्यादिसम्पत् ।
संसारेऽस्मिन्मानवानां दुरापा सामग्रीयं धर्ममार्गे समग्रा ॥१॥

२. इह हि भूतलवह्निनभस्वतामसुमतो बत कायममुञ्चतः ।
व्रजति काल उपार्जितकर्मणां स्थितिवशादपसंख्यमसौख्यतः ॥२॥

३. अथ कथमपि प्रैति प्राणी वनस्पतिकायके-
ष्वतिगुरुतराज्ञानच्छन्नस्त्वनन्ततनुत्वगः ।
गमयति ततोऽनन्तं कालं मलीमसकर्मणां
किमिव हि न वा योगो दद्यादशर्म शरीरिणाम् ॥३॥

४. द्वि-त्रि-चतुःपरिणामपरीतैः स्यात्करणैर्यदि जन्तुरुपेतः ।
कर्मबलाद्विकलेन्द्रयनामा सोऽपि मनोविकलो न खलु ज्ञः ॥४॥

५. अथ कथमपि जन्तुर्जातु पञ्चेन्द्रियत्वं
यदि जगति लभेत प्राप्तसंमूर्च्छनात्मा ।
न खलु हृदयशून्यः सोऽपि सम्पद्यतेऽस्मिन्
नशुभ-शुभविचारोदारमार्गे समर्थ : ॥५॥

६. अथ गर्भजपञ्चेन्द्रियभावो भविनो भवे भवे सुचिरात् ।
तिर्यक्षु सोऽपि विफलः सकलामलबोधविकलेषु ॥६॥

७. इह तथापि मृगाऽहि-मृगाधिप-द्विप-कपिप्रमुखाः स्थलजन्मनः ।
मकर-दर्दुर-कूर्म-कुलीरकप्रभृतयः सलिले घनजन्तवः ॥७॥

८. पिक-चकोर-मयूर-शरारयः शुक-कपिञ्जल-वञ्जल-सारसाः ।
चटक-कौशिक-कोक-बकोटकाद्यपरिमाणविधाश्च विहङ्गमाः ॥८॥

९. इति विविधविभेदे भूरिभेदे तिरश्चा-
मिह सति बत जाते जन्तवो जायमानाः ।
सुनिबिडगुरुकर्मच्छिद्रमासाद्य केचित्
सकलगतिसमर्थं मानुषत्वं लभन्ते ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१०. द्विजाय किल कोऽप्यदान्मुदितचक्रवर्ती क्षितौ
समस्त गृहभोजनं प्रतिकुटुम्बकोटीः क्रमात् ।
द्वितीयपरिवर्तनं पुनरसावपि प्राप्नुया-
न्नवैव भववर्तिनां भवति मानुषत्वं पुनः ॥१०॥

११. हृदयविचिन्तितपातिभिरपि पाशैः कश्चनापि रममाणः ।
द्यूते जीयेतापि हि न भवति मानुष्यमिह भूयः ॥११॥

१२. समस्तजगतीगतं सकलधान्यजातं जनाः
समेततिलतण्डुलोपमविमिश्रभावस्थितम् ।
पृथक् पृथगपि क्षमा गतसहायवृद्धाङ्गना
विधातुमिह देहिनो न पुनरेति मानुष्यकम् ॥१२॥

१३. अष्टसहस्रस्तम्भैरष्टसहस्राश्रिभिः सभा तस्याः ।
एकैकाश्रिर्जेया सहस्रमष्टाधिकं वाराः ॥१३॥

१४. इत्येवं सर्वसभां जित्वा राज्यं पणो ग्रहीतव्यः ।
एकामपि चेद्वारां हारयति पुनर्जयेन्मूलात् ॥१४॥

१५. अपि सम्भवेदिदं खलु विधिनाऽनेनापि कोऽपि तद्राज्यम् ।
गृह्णीयान्न तु जीवो लभेत मानुष्यमिह भूयः ॥१५॥

१६. महार्णवजलान्तरस्फुटितयानपात्रच्युते
गतोऽम्बुनि पुनश्चिरादपि मणिव्रजो लभ्यते ।
भवेदिति न चाऽङ्गिनां भवसमुद्रमध्येऽभितो
मुहुर्विपरिवर्तिनां भवति मानुषत्वं पुनः ॥१६॥

१७. स्वप्ने विधुं मुखसितं शुभदं विलोक्य
कश्चित्कथञ्चन नरस्तदवेक्षणाय ।
भूयः स्वपित्यपि भवेद् बत तस्य लाभो
मानुष्यकस्य पुनरेव न दुर्लभस्य ॥१७॥

१८. सव्यापसव्यं भ्रमतोऽतिवेगा-
च्चक्राष्टकस्याऽरविचालमाप्य ।
अप्यस्त्रविद्विध्यति कोऽपि राधां
न मानुषत्वं पुनरेति जन्तुः ॥१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१९. छन्ने शैवलवल्लीभिरभितः पातालनिम्ने ह्रदे
कूर्मः कश्चन कार्तिकीनिशि नभश्छिद्रेण दृष्ट्वा गतः ।
पातालात्स सबन्धुरेति सुचिराद्यावत् क्व सा कार्तिकी
तच्छिद्रं क्व च तद्वदेव भविनां भूयोऽपि मानुष्यकम् ॥१९॥

२०. सुरेण युगसम्ययोरपरपूर्वरत्नाकरा-
म्बुमध्यपरिमुक्तयोर्जलतरङ्गभङ्गिभ्रमात् ।
भवेदपि युतिर्युगानुगतरन्ध्रनिक्षेपका-
ऽचिरादपि न चाऽङ्गिनां भवति मानुषत्वं पुनः ॥२०॥

२१. स्तम्भं रत्नमयं महान्तममरः संचूर्ण्य सूक्ष्माणुशः
कश्चिन्मेरुशिरःस्थितो नलिकया फूत्कृत्य दिक्षु क्षिपेत् ।
अप्येषा परमाणुसंहतिरिहाऽनन्तैः परावर्तनैः
स्वां स्तम्भाकृतिमेति नैव भविनां भूयोऽपि मानुष्यकम् ॥२१॥

२२. दुर्लभमिति मानुष्यं चतुरधिकाशीतियोनिलक्षेषु ।
भ्राम्यति यदेष जीवः प्रकटं कुलकोटिगहनेषु ॥२२॥

२३. अथ भवति मनुष्यः पुण्ययोगेन जन्तु-
स्तदपि खलु दुरापं क्षेत्रमार्यं यदेतत् ।
अशुभशुभविचाराचारचातुर्यवर्याः
स्वपरहितसमर्थाः सन्ति सन्तो यदन्तः ॥२३॥

२४. तदपि च भरतै-रावत-महाविदेहानि पञ्चधा तानि ।
प्रत्येकं द्वात्रिंशद् विजयानि पृथग्विदेहेषु ॥२४॥

२५. इति सप्तत्यधिकशतं पञ्चदशसु कर्मभूमिषु ज्ञेयम् ।
क्षेत्राणां प्रत्येकं षट् खण्डानि च पृथक् तानि ॥२५॥

२६. एतेषु चैकमेव हि मध्यमखण्डं वदन्ति समयज्ञाः ।
आर्यमनार्यजनानां शेषाणि तु पञ्च पञ्च स्युः ॥२६॥

२७. तत्रापि चाऽऽर्यदेशाः सार्द्धा खलु पञ्चविंशतिर्येषु ।
उत्पद्यन्ते द्योतितभुवनत्रितया जिनाधीशाः ॥२७॥

२८. बर्बर-भिल्ल-किरात-तुरुष्काः कुञ्जरकर्ण-तुरङ्गमकर्णाः ।
एवमनेकविधाः स्युरनार्या धर्मपदश्रुतिवञ्चितकर्णाः ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२९. यदि कथंचिदिहार्यमुपार्जितो-
ऽर्जितंशुभादपि देशमवाप्नुयात् ।
तदपि विन्दति नाखिलसद्गुणै-
रविकलं विकलङ्कमलं कुलम् ॥२९॥

३०. कुले विशाले विमलेऽपि जाता
न जन्तवो जातु सुजातिजातिम् ।
तिरस्कृताः स्वीकृतदुष्कृतेन
प्रायः सुदुष्प्रापतरां लभन्ते ॥३०॥

३१. अथ जाति[तो?] विशुद्धे लब्धेऽपि हि मानुजे भवे भविनाम् ।
न भवति पृथुप्रभूता-पायमिहाऽऽयुश्चिरं प्रायः ॥३१॥

३२. न काऽप्यवस्था न च कोऽपि कालो
न कोऽपि देशो न च केऽपि जीवाः ।
न वस्तु किञ्चित्तदिहाऽस्ति लोके
जीयेत यैरेव रिपुः कृतान्तः ॥३२॥

३३. गर्भे ऽसृक्-क्रव्यपिण्डा निजजनकजनोत्सङ्गिताङ्गाः शिशुत्वे
कौमारे सौकुमार्यान्वितधृततनवो यौवनेऽनङ्गतुङ्गाः ।
वृद्धत्वेऽन्धैडमूकाश्चलदखिलजराजर्जराङ्गाश्च जीवाः
क्रुध्यत्कीनाशपाशाश्रितनिबिडगलाः कालमासादयन्ति ॥३३॥

३४. नो देवेन्द्रा न च(चे)न्द्रा न च दनुतनया नो नरेन्द्रा न रुद्रा
नो नागेन्द्रा न सूर्या ग्रहगण-भगणा नो न वा राक्षसेन्द्राः ।
नो वा निःशेषलोकत्रयनतचरणाम्भोरुहास्तीर्थनाथाः
स्वायुःपर्यन्तकालोत्तरमपरमलं स्थातुमेकं निमेषम् ॥३४॥

३५. मन्त्रैः सतन्त्रैर्गुरुचित्रयन्त्रै-
र्बुद्ध्या ससिद्ध्याऽतुलकायशुद्ध्या ।
मुद्राभिरिन्द्रादिसुरार्चनैर्वा
मृत्युं जना जेतुमलं न जातु ॥३५॥

३६. सन्ध्याराग इव क्षणद्युतिरिव श्रान्तश्वजिह्वेव वा
प्रक्लाम्यच्छितिकण्ठकण्ठ इव वा ज्वालेव वाऽर्चिष्मतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोला मानवजीवितस्थितिरियं स्वप्नेन्द्रजालोपमा
यत्राऽऽभान्ति हिरण्य-बान्धव-वधू-गेहादिसङ्गा इमे ॥३६॥

३७. अहह पश्यत पश्यत कौतुकं
प्रतिकलं सकलासुमतां तनोः ।
वदननिःश्वसनापगमच्छलात्
द्रुतमपैतुमिवेच्छति जीवितम् ॥३७॥

३८. सविधविविधापायैरायुर्निरन्तरमातुरी-
कृतमलमिह स्थास्यन्त्येतत् कथं तु कियच्चिरम् ।
फलमिव लघु स्वादु क्षिप्तं क्षुधार्तमुखान्तरे
निबिडदशनश्रेण्याकीर्णे समग्रमखण्डितम् ॥३८॥

३९. शैत्यं तोये चलनमनिले पावके दाहकत्वं
चन्द्रज्योत्स्नास्वमृतमयता द्योतकत्वं दिनेशे ।
काठिन्यं च प्रकृतिरुपले सज्जने मिष्टभावो
यद्वत् [तद्वत्]जगति जनताजीविते चञ्चलत्वम् ॥३९॥

४०. कास-श्वासा-ऽऽस्यशोषः श्वयथु-दवथुभिः श्लीपद-श्लेष्म-सिध्म-
स्फोट-त्रोटा-ऽक्षिशूल-ज्वर-पवन-गडु-श्वित्र-कण्डूति-गण्डाः ।
अर्शो-ऽपस्मार-मूर्च्छा-भ्रमि-तिमिर-शिरोवेदनाद्यैरुपेताः
केचिद्दुःखेन कालं कथमपि जगति प्राणिनः प्रेरयन्ति ॥४०॥

४१. न त्राणाय कलत्र-पुत्र-सुहृदः स्निग्धा न वा ज्ञातयो
नो माता सुतवत्सला कुलवरस्तातो न वा स्नेहतः ।
गाढाबन्धनिबद्धबान्धवधियो नैकोदरा भ्रातरो
रोगातङ्किजनस्य जातु जगति त्यक्त्वात्मकर्मामि(ण्य?)लम् ॥४१॥

४२. शतभोगरतो...पवादि यदि गच्छति( ? ) पृच्छति वा गणकम् ।
स्वपुराकृतकर्मवशालुगतं न तथापि निरेति गदाष्टशतम् ॥४२॥

४३. यथाम्भसामास्पदमम्बुराशि-
र्भानां नभो भूमिभृतां च भूमिः ।
तद्वद्रुजाभाजनमङ्गभाजा-
मङ्गं पुरा यैर्न दया व्यधायि ॥४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४४. अथ लभेत शुभैर्यदि कल्यतां
स्वपरकार्यविधौ च समर्थताम् ।
गृहकुटुम्बधनाकुलमानसः
क्व शुभयोगमुपैति तथापि सः ॥४४॥

४५. इह हि गृहिणां हन्ताऽज्ञानां महाज्वरदारुणो
दहति विरहोऽभीष्टैः सार्द्धं मनः सकलेवरम् ।
भवति यदि चित्तैः संयोगः स मोहमहान्ध्यकृत्
कथय कतरो धर्मस्य स्यात् क्षणः श्रवणं प्रति ॥४५॥

४६. आराधयामि नृपमम्बुनिधिं तरामि
देशान्तरेषु विचरामि कृषिं करोमि ।
नौमीश्वरं किमु सुरं विवरं विशामि
पुंसामिति व्रजति चिन्तयतामिहायुः ॥४६॥

४७. अद्यैतत् श्वोऽपरेद्युः परुदनु च परार्यग्रतो वा करिष्ये
कार्यं सिध्येन्नवेदं कति च मम निजा विद्विषो वा कियन्तः ।
इत्थं लक्ष्म्यापि योगे न निशि न दिवसे चेह पुंसां कथञ्चित्
सौख्यं संख्याव्यतीतैर्विधुरितमनसामाधिकल्लोलजालैः ॥४७॥

४८. तार्णं जीर्णं कुटीरं वृषवकुलबिलैः संकुलं धान्यशून्यं
काणा काली कुरूपा कटुरटनपरा गेहिनी स्नेहहीना ।
दण्डी खण्डा च हण्डी श्रुतिविकलखरी द्वारि कोकूयमाना
तिष्ठत्येषाऽपि भूतिः प्रभवति भविनां हा महामोहहेतुः ॥४८॥

४९. शुष्कं रूक्षं क्षुधार्त्तः कदशनमशनैर्वल्गमानोऽन्यगेहे
कृत्वा कर्माऽतिकष्टं हतभृतकनरो यावदास्तेऽथ तावत् ।
वाचाटा दुष्टधृष्टा रटति कटुतराक्रोशनैः स्वामिभार्या
दुःखं भुङ्क्ष्वेति मुखै(मूर्खै?)र्भृकुटिकुटिलतास्येति पापस्य पुष्पम् ॥४९॥

५०. इति जगति पुमांसः सुस्थिता दुःस्थिता वा
द्रविणकणकुटुम्बव्याप्तिभिर्व्यग्रचित्ताः ।
क्षणमिह न लभन्ते हन्त धर्मोपदेशा-
ऽमृतरसजलधीनां सेवनायै गुरूणाम् ॥५०॥

५१. सुखेन लभ्ये न यथेह लोके

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्तामणिः कल्पमहाद्रुमो वा ।
महानिधिर्वाऽमृतकामधेनु-
स्तद्वज्जिनेन्द्रोदितधर्मदेष्टा ॥५१॥

५२. भवेऽथवैकत्र करोति किञ्चित्
कल्पद्रुमादिः फलमल्पफल्गु ।
गुरुर्जिनेन्द्रोदितमुक्तिमार्गो-
पदेशतः शाश्वतसौख्यदाता ॥५२॥

५३. न तेषु दोषानुगतस्य विच्युति-
र्नृणां मनःसन्तमसस्य जायते ।
जिनेन्द्रभानोः किरणाः सुनिर्मला
लसन्ति देशेषु न येषु सूरयः ॥५३॥

५४. सूरिस्तीर्थं जङ्गमं मर्त्यलोके
सूरिस्तत्त्वालोकने हस्तदीपः ।
सूरिर्मोक्षश्रीसमायोगदूतः
सूरिः साक्षाद्धर्मबन्धुर्बुधानाम् ॥५४॥

५५. यत्सम्पत्त्या न युक्ता जगति तनुभृतो यच्च नापद्विमुक्ता
यन्नाधिव्याधिहीनाः सकलगुणगणालङ्कृताङ्गाश्च यन्नो ।
यन्नो स्वर्गं लभन्ते गतसकलभयं यच्च नो मोक्षसौख्यं
दुष्टः कल्याणमालादलनपटुरयं तत्र हेतुः प्रमादः ॥५५॥

५६. वरं बुभुक्षातुरसिंहसङ्गतं
वरं सुरुष्टोरगभोगघट्टनम् ।
वरं कृतान्ताननसंप्रवेशनं
न तु प्रमादः शुभदः प्रयोजने ॥५६॥

५७. कृशानुतः स्यादपि पङ्कजोदय-
स्तुषारतः स्यादपि शीतसंक्षयः ॥
विषाशनात् स्यादपि जीवितं नृणां
न तु प्रमादेन कदापि सम्पदः ॥५७॥

५८. निद्रा ह्यालस्यमूलं विततमतिसरित्स्रोतसः सेतुबन्धः
कूलं विज्ञानसिन्धोः स्मृतितरुपरशुर्मोहमल्लाधिराज्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वाध्याय-ध्यान-दान-व्रत-नियम-दयादिक्रियाणां विरामो
विश्रामः कामितानां सहृदयकरणग्रामधाटीनिपातः ॥५८॥

५९. कलङ्कविकलं कुलं विमलजातिरव्याधिता
सुरूप-सुभगत्ववद्वपुरुदारमन्तःपुरम् ।
विलाससहिताः श्रियः सुचिरजीवितव्यं बलं
यशोऽथ पदमूर्जितं भवति धर्मतो देहिनाम् ॥५९॥

६०. जगत्प्रसिद्धेषु क(कु)लेषु मानवा
भवन्ति यन्निर्मलताविशालिषु ।
भवान्तरोपार्जितधर्मशाखिनो
वदन्ति पुण्यं तदिहाऽस्तकल्मषाः ॥६०॥

६१. प्रियाऽनुकूला कलहेन वर्जिता
प्रियंवदा निर्मलशीलशालिनी ।
स्वरूप-सौन्दर्यविनिर्जिताप्सरा
भवेदपुण्यस्य गृहे न गेहिनी ॥६१॥

६२. स्वबन्धुभोग्या परिभोगयोग्या
विशिष्टसन्मानविधानसाराः ।
कृतैहिकामुष्मिकसर्वकार्याः
श्रियस्तताः सन्ति शुभेन पुंसाम् ॥६२॥

६३. कुशी-कुठारा-ऽसि-शरा-स्त्र-शस्त्री-
चुल्ल्यग्नि-गन्त्री-हलयन्त्रमुख्यम् ।
पापाधिकार्यन्यदपीह वस्तु
स्यात्संयुतं पापफलोऽतिचारः ॥६३॥

६४. निदानहीनं च सदैव दानं
देयं यतिभ्यो दुरितक्षयाय ।
निदानकर्ता तु कपर्दकेन
स्वर्णस्य कोटिं विजहाति मूढः ॥६४॥

६५. विक्रीणाति यथेह कश्चन कुधीश्चिन्तामणिं काचतो
यद्वत्कल्पमहामहीरुहवनान्येरण्डखण्डेन वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वा चाऽमृतपूर्णकुण्डनिकरं क्षाराम्बुकूपात्तथा
दानाद्यर्जितपुण्यराशिमसमं तुच्छैर्निदानैर्नरः ॥६५॥

६६. इह हि दानफलेन जिनागमे
निगदिता बहवो नरपुङ्गवाः ।
भवसमुद्रमपारमनाकुलाः
किल विलंघ्य गताः परमं पदम् ॥६६॥

६७. श्रेयांसः प्रथमाय तीर्थपतये दानेन लेभे शिवं
मोक्षान्तं धनसार्थवाहभवतः श्रीनाभिसूनः(सूनुः) सुखम् ।
संप्राप्तः कृतपुण्यको वितरणाद्यच्छालिभद्रोऽथवा
वन्द्याऽऽर्याऽपि च चन्दना फलमलं तच्चापि किं वर्ण्यते ॥६७॥

६८. स्वाधीनं स्वगृहे नयाऽर्जितधनं श्रद्धा च दातुं परा
पात्रं निर्मलशीलशालि सदनद्वारे समभ्यागतम् ।
काले कल्प्यमनल्पवस्तु च पुरः सज्जं तथा गेहिनां
सामग्रीयमनन्तपुण्यफलकृद् दानस्य दुष्प्रापिका ॥६८॥

६९. क्वापि ज्ञानं दर्शनं क्वापि पात्रे
शीलं क्वापि क्वापि चैषां द्विषां वा (?) ।
एकस्थं चेत् तत्त्रिकं प्राप्यतेऽलं
किन्नावाप्तं स्यात्तदा दायकेन ॥६९॥

७०. सङ्घे तत्त्रितयं समस्ति समकं यस्मात्ततः सद्धनैः
सङ्घं पूजयता जनेन सुधिया श्रद्धाधिकं शक्तितः ।
किं न स्यात्परिपूजितं यदखिलास्तीर्थाधिपाः संनमत्-
त्रैलोक्या अपि धर्मदेशनविधौ कुर्वन्ति तस्मै नमः ॥७०॥

७१. प्रत्याख्यानं साधुशुश्रूषणं च
ज्ञानाभ्यासं चैत्यसाध्वादिकृत्यम् ।
सप्तक्षेत्र्यां वित्तबीजस्य वापं
यात्रां चैत्ये तीर्थयात्रादिकं वा ॥७१॥

७२. यत्रार्यलोका निवसन्ति देशे
स्वदेशधर्मान्वयमार्गशीलाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नृपाश्च सन्न्यायजनानुकूला-
स्तत्रोचितः श्राद्धजनस्य वासः ॥७२॥

७३. निर्धर्मलोके न तुरुष्कदेशे
न बर्बरद्वीपनिवासिमध्ये ।
श्राद्धो वसेन्नापि तथा प्रकारे-
ऽन्यत्रापि धर्मश्रुतिशून्यकर्णे ॥७३॥

७४. स्थाने च यत्रास्ति जिनेन्द्रचैत्यं
साधर्मिकाः साधुजनागमश्च ।
प्रायेण लोकोऽपि च धर्मशीलः
सुभद्रकः पातकभीरुकश्च ॥७४॥

७५. न चोरभिल्लादिनिवासपल्ल्यां
न प्रान्तदेशस्थितदुष्टवासे ।
कुतीर्थिकानां च न जातु मध्ये
सच्छ्रावकाणामुचितो निवासः ॥७५॥

७६. अचलविमलदृष्टिर्नष्टदुष्टाभिसन्धि-
र्विनयनयललाटन्यस्तहस्ताञ्जलिः सन् ।
प्रतिदिनमुपयुक्तो यो यतिभ्यः शृणोति
श्रुतमिह स गृहस्थः श्रावको वादिवृन्दैः ॥७६॥

७७. नीचासनस्थो विकथाविहीनो
गुप्तो वितन्द्रो विनयोपपन्नः ।
दत्तावधानो मदमानमुक्तः
सच्छ्रावको जैनवचः शृणोति ॥७७॥

७८. ततोऽधिकारी सुविशुद्धभूमौ
दलेन शुद्धेन विधानशुद्ध्या ।
प्रवर्धमानातुलभावशुद्धिः
सुधीर्विदध्याज्जिननाथधाम ॥७८॥

७९. नयार्जितद्रव्यपतिर्महाशयः
सुदृष्टिराचारपरः सुबुद्धिमान् ।
नरोऽधिकारी जिनवेश्मकारणे
सदा गुरूणां च वचोऽनुवर्तकः ॥७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८०. या वाऽस्तु विद्योदितशुद्धियुक्ता
नीत्या गृहीता न परोपतापात् ।
भूमिर्जिनेन्द्रालयकारणेऽसा-
विष्टा विशिष्टाऽऽयतिसौख्यदत्वात् ॥८०॥

८१. दलं च काष्ठाद्युचितं क्रयात्तं
न देवतोद्यानवनादिसत्कम् ।
ग्रन्थ्यादिदोषैर्विकलं सुसारं
शुभं शुभैर्वा शकुनैर्गृहीतम् ॥८१॥

८२. विधिरपि भृतकादीन् यत्समाधानयुक्तात्
समुचितभृतिदानात्सर्वदैवेह सर्वान् ।
वयमिव ननु यूयं गोष्ठिकाः कीर्तितेऽस्मि-
न्निति मृदुवचनैश्चाऽऽसन्नलोकं च कुर्यात् ॥८२॥

८३. प्रतिदिवसं च शुभाशयवृद्धिं विदधीत स इति चिन्तनया ।
अविकलनरजन्मफलं मम शिवबीजाप्तितो जातम् ॥८३॥

८४. तथेदमालोक्य जिनेन्द्रमन्दिरं
निरस्तरागाकृतिबिम्बमत्र वा ।
जिनेन्द्रपूजामथवाऽतिसुन्दरां
प्रबोधमाप्स्यन्ति सुभव्यजन्तवः ॥८४॥

८५. केचिज्जिनेन्द्रार्चनवन्दनेऽथ वा
स्वाध्यायसद्ध्यानसुभावनादि वा ।
धर्मोपदेशादि च कृत्यमादरा-
दस्मिन् करिष्यन्ति ममाऽनुमोदनात् ॥८५॥

८६. कमिह जगति पुंसस्तस्य नो सिद्धमिष्टं
प्रलयमघमुपेतं किं न वाऽत्यन्तदुष्टम् ।
जिनभवननिभेनाऽपारसंसारसिन्धू-
त्तरणसरलसेतुर्येन बद्धो बुधेन ॥८६॥

८७. निजकुलगगनशशाङ्कः सुकृतामृतसुरसरित्तुषाराद्रिः ।
धन्यः स एव भुवने जिनभवनं कारितं येन ॥८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८८. सत्कीर्तिवल्लीगुरुमूलकन्दं
सद्धर्मकल्पद्रुवनालवालम् ।
निर्वाणसौधादिमपीठबन्धं
जिनेन्द्रचैत्यं सुकृतीकरोति ॥८८॥

८९. जीर्णोद्धरणं च तथा जिनभवने यः करोति सुमहेच्छः ।
धर्मफलकल्पवृक्षः शुष्यन्सिक्तो भवेत्तेन ॥८९॥

९०. सकलजनमनोज्ञं स्वर्णरत्नोपलाद्यैः
सुघटितमकलङ्कं लक्षणाकारसारम् ।
द्रुतमथ जिनबिम्बं तत्र चैत्यालयान्त-
र्भवति रुचिरमुच्चैः कारणीयं सुधीभिः ॥९०॥

९१. अङ्गुष्ठमात्रापि जिनेन्द्रमूर्तिः
कारापिताऽनन्तशुभावहेह ।
चिन्तामणिः किन्न किलाऽल्पकोऽपि
संचिन्तितं यच्छति वस्त्वतुच्छम् ॥९१॥

९२. जिनेन्द्रबिम्बस्य च कारणे विधिः
शुभे मुहूर्ते शकुनैश्च शोभनैः ।
प्रपूज्य बिम्ब-स्थपतींश्च वैभवो-
चितस्य मूल्यस्य समर्पणं मुदा ॥९२॥

९३. अथाऽल्पवित्तः स्थपतिर्भवेत्तदा
करोति मूलं प्रददाति चाऽधिकम् ।
यदत्र कृत्ये प्रतिषिद्धमादरात्
परात्मनोरप्यसमाधिवर्तनम् ॥९३॥

९४. निष्पन्ने सति बिम्बे दशदिवसाभ्यन्तरे प्रतिष्ठाऽस्य ।
कर्तव्या सकलौषधितीर्थजलाद्यखिलसामग्र्या ॥९४॥

९५. त्रेधा प्रतिष्ठा गदिता मुनीन्द्रै-
र्व्यक्त्याह्वया चेह ततोऽपरा तु ।
क्षेत्राभिधानाऽथ महाभिधाना
तासां स्वरूपं प्रतिपादयामि ॥९५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९६. यदीयतीर्थं किल वर्तमानं
तदा तदीयप्रतिमाप्रतिष्ठा ।
आद्या, ततोऽन्या वृषभादिकानां
तीर्थाधिपानां गदिताऽखिलानाम् ॥९६॥

९७. सप्तत्यधिकजिनेश्वरशतप्रतिष्ठा तु निगदिता मुनिभिः ।
सकलक्षेत्रजिनानां भक्तिविधानान्महासंज्ञा ॥९७॥

९८. मुक्तिगतदेवतानां बिम्बाधिष्ठानसम्भवो न यतः ।
भवति न च तदुपकारस्तस्या बिम्बार्चनादिभ्यः ॥९८॥

९९. जगति यशो हृदि धर्मः शर्मण्यात्मा निरञ्जने नियतम् ।
जिनबिम्बसुप्रतिष्ठाच्छलात्प्रतिष्ठापितो भव्यैः ॥९९॥

१००. ये तीर्थनाथागमपुस्तकानि
न्यायार्जितार्थैरिह लेखयन्ति ।
ते तत्त्वतो मुक्तिपुरीनिवास-
स्वीकारपत्रं किल लेखयन्ति ॥१००॥

१०१. ज्ञानादिनिःशेषगुणौघरत्न-
रत्नाकरे बिन्दुरिवाम्भसोऽन्तः ।
संघे नियुक्तो निजवित्तलेशः
स्यादक्षयः क्षीणपरिक्षयेऽत्र ॥१०१॥

१०२. रत्नेषु चिन्तामणिरत्र यद्वत्
सारस्तरूणामपि कल्पवृक्षः ।
देवेषु सर्वेष्वपि वीतराग-
स्तद्वत्सुपात्रेषु सुसाधुसंघः ॥१०२॥

१०३. यात्रामहोत्सवविधिश्च जिनेन्द्रचैत्ये
कार्यो जिनप्रवचनोन्नतिहेतुभूतः ।
यस्मादिह प्रवचनोन्नतिरभ्यधायि
सम्यक्त्वरत्नविमलीकरणाङ्गमुच्चैः ॥१०३॥

१०४. पञ्चकल्याणकादीनामङ्गीकृत्य दिनादि सा ।
अन्यद्वा शासनोन्नामहेतुभूतं विधीयते ॥१०४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ अथ मेघः ]

१०५. यथा धीरं धीरं रससि [१]रससिक्तेन मरुता
रुतासक्तं केकिव्रजमपि यथाऽऽशु प्रथयसि ।
तथा शङ्के धाराधर ! धरणिमुद्धर्तुमभवद्
भवत्प्रारम्भोऽयं भृशमकृशलोकम्पृणगुणः ॥१॥

१०६. अमूका मण्डूका पुलकबहुलं चातककुलं
बकाः कान्त्युद्रेका मदभरकरः केकिनिकरः ।
इति प्रायेणैतन्मुदमगमदम्भोद ! भवतः
समारम्भे दम्भेरित[२] इव न हंसाः कथममी ॥२॥

१०७. अपि प्रारम्भेऽस्मिन्न किरसि जलं चेदविकलं
समुद्यत्सम्पत्तौ जलधर ! तदा मा स्म विकिरः ।
समन्तान्निर्घोषैः पथिकविकचेन्दीवरदृशा-
मरे ! वारंवारं जनयसि कथं निर्दय ! भयम् ॥३॥

अथ सिंहः

१०८. इमे दन्तक्रीडाकृतविटपिपीडाः करटिनः
कटक्रोडैस्तावद्दधति मदधारापरिमलम् ।
अयं यावद्धीरध्वनिजनितजाड्यज्वरभरः
करत्क्रूराक्रान्तिं कलयति न कण्ठीरवयुवा ॥४॥

१०९. अरेरे मातङ्ग ! ग्लपयसि कथं तानपि तरून्
कराग्रव्यापारैः परिमलपरीपाकसुहृदः ।
यदीयच्छायाभिस्तव दवथु[३]राशुप्रमथितः
सदा माद्यत्कण्ठीरवरवजवव्यापृतिभवः ॥५॥

११०. अम्भोधरैः कलुषितेषु जलाशयेषु
निर्मूलितेषु च कुशेशयकाननेषु ।
हे मानस ! त्वदुपकण्ठमकुण्ठवीचि-
वाचालमाश्रयितुमिच्छति राजहंसः ॥६॥

---

१. 'सजलेन' इति टिप्पणी ।
२. 'कपटयुक्तस्य इव' इति टिप्पणी । ३. तापः इति टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१११. मन्दाकिनीकनककैरविणि ! त्वदीयं
किं तत्तपः कथय येन पिनाकपाणेः ।
आसाद्य मौलिमधिगच्छसि यामिनीश-
सम्पर्कजानि सततं सुखसौहृदानि ॥७॥

११२. येषां बभार मदमन्वहमम्बुजाना-
मुत्कर्षसङ्गमकरं मकरन्दवारि ।
शैवालसन्ततिषु सम्प्रति सङ्गतासु
संकुच्य तेऽपि समयं गमयन्ति हंसाः ॥८॥

अथ गजः

११३. अये वन्यस्तम्बेरम ! कमलकिंजल्कजनित-
प्रभारम्भः कुम्भस्तव सरभसं भाति न यथा ।
यथा हेलोन्मीलत्परिणमनपाण्डित्यनिबिड-[4]
प्रहारव्याघूर्णद्धरणिधरधूलीधवलितः ॥९॥

११४. मदं यस्याऽऽघ्राय त्वरितमितरे काननभुवि
ध्वनिं वाऽध्वानं च क्षितिधरनिभास्तत्यजुरिभाः ।
अये दैवान्मन्दीभवदसमसारस्य पुरतो
वपुः क्रीडालोलं वहति हरिणस्तस्य करिणः ॥१०॥

अथ चूतः

११५. त्वयि मद[न]मनो मनस्विनीनां
नवमधुना मधुनाऽधुना धुनाने[5] ।
न भवति यदसौ रसालशाखी
भृशमुभयोरपि तत्कथं वृथा स्यात् ॥११॥

११६. समारम्भि स्मेरा पिकसहचरीभिः सरभसं
वसन्तादौ यस्मिन् मधुरवचना गीतिरचना ।
सदैवादामूलत्रुटितविटपैः सम्प्रति दव-
स्फुरत्कीला लीलामहह सहकारः[6] कलयति ॥१२॥

४. 'तिर्यग्दत्तप्रहारत्वं' इति टिप्पणी ।
५. नवमकरन्देन, वसन्तेन, कम्पयितरि इति टिप्पण्यः ।
६. 'आम्र' इति टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११७. इह क्रीडोद्याने बकुलमुकुलामोदमुदित-
द्विरेफस्त्रीगीतिग्रथितपथिकप्रीतिरुचिरे ।
अये ! नीतः स्फार्ति फलपरिमलच्छायविकलः
समन्तात्केनाऽयं खदिरविटपी कण्टकमयः ॥१३॥

११८. अमुष्मिन्नुद्याने विहगखल एष प्रतिपदं
विलोलः काकोलः क्वणति पटु यावत्कटुतरम् ।
सखे तावत्कीर ! दृढय हृदि वाचंयमकलां
न मौनेन न्यूनीभवति गुणभाजां गुणगणः ॥१४॥

११९. वार(रां)नाथ ! वराटिकामपि समादातुं जलेभ्यस्तव
प्रायः कम्पकलाविलासमसकृच्चित्ते विधत्ते जनः ।
अन्तर्जातजलौघयन्त्रितमहायत्नानि रत्नानि ते
लुब्धां लब्धुमहो मनोरथपथं यामः कथं तद् वयम् ॥१५॥

## अथ शङ्खः

१२०. नैर्मल्यमप्रतिमममम्बुनिधेश्च जन्म
तच्चक्रपाणिकरपङ्कजगोचरत्वम् ।
यस्येति ते चरितमुज्ज्वलमस्ति सत्त्वं
हे शङ्ख ! किं खल इवाश्रितवक्रभावः ॥१६॥

१२१. अन्यैव सा वसुमती समुदेति यस्या-
स्तत्कुङ्कुमं किमपि कान्तिमयं समन्तात् ।
अस्याः पुनः सरभसं विकसत्कुशुम्भ-
सम्भूतिरेव सुभगङ्करणी भुवोऽभूत् ॥१७॥

१२२. अहो तुल्यप्रेम्णा ग्रहनिवहमेनं वहसि यन्
महःस्तोमाभावादधिकतरमात्मम्भरिरुचम् ।
तथापि त्वं व्योम ! प्रतिदिवसमस्मात् प्रथयसि
प्रकाशप्राग्वीचि[प्र]भवभरमम्भोरुहविभोः[७] ॥१८॥

१२३. हंसान्निरस्य वहति स्म बकावकाश-
माकाशमाशु जलदाकुलितं किमेतत् ।

७. 'रवेः-' इति टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अश्रान्तदर्शितमहत्त्वगुणाश्रयेऽपि
शून्ये जडात्मनि च नाम कुतो विवेकः ॥१९॥

अथ विहङ्गाः

१२४. गतः कालो यस्य स्फुरदसमसौरभ्यरभस-
प्रसक्तप्रोन्मत्तभ्रमरमुखरे चूतशिखरे ।
इदानीं दुर्दैवादहह स पिकः पिप्पलतरू-
च्छदच्छेदच्छेकां कवलकलनां कन्दलयति[८] ॥२०॥

१२५. पयः पङ्कीभूतं तटमुपचितं शैवलमलैः
तिरोभूतास्तेऽपि क्वचन तिमयः संभृतभियः ।
गतं यद्यप्येतां विकृतिममितां पल्वलमिदं
न सेवाहेवाकस्तदपि बक ! ते मुञ्चति मनः ॥२१॥

अथ सर्पः

१२६. एतस्य भीषणभुजङ्गशिशोरकाण्ड-
लीलागलस्थलगलद्गरलस्य गाढम् ।
गर्वायसे किमिदमाशु बिलं विलङ्घ्य
हे मूर्ख ! मूषक ! मुमूर्षुरसि त्वमेव ॥२२॥

अथ द्रुमाः

१२७. न यत्र व्यातेनुः सुरभिसमयारम्भरभसा-
च्चिरं दोलालीलामपि किमपि पङ्केरुहदृशः ।
स वज्रेण ज्वालावलिवलयिना बालतिलकः
कथाशेषं नीतः कुसुमशरसौराज्यसचिवः ॥२३॥

१२८. आलिङ्गितोऽसि रभसेन वसन्तलक्ष्म्या
संभूषितोऽसि सहकारनवप्रसूनैः ।
द्वित्रैः फलैरपि किमेनमुपान्तभाज-
मद्यापि बालपिकमिद्ध ! मुदं न धत्से ॥२४॥

१२९. एतस्मिन्विपिने परःशतलतालोकप्रियंभावुके
बालेऽयं नवमालिकैव किमपि प्रावीण्यमालम्बते ।

---

८. 'विस्तारयति' इति टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतस्याः क्षणमप्यवाप्तकुसुमक्रोडासनाः सन्निधिं
यन्नोज्झन्ति झषध्वजप्रणिधयः पुष्पन्धयश्रेणयः ॥२५॥

**अथ सरः**

१३०. एतस्मिन् मरुमण्डले परिचलत्कल्लोलकोलाहले
क्रीडत्कुङ्कुमपङ्कमङ्कविकसन्निःशङ्कनीरद्विपम् ।
केनेदं विकसत्कुशेशयकुटीकोणक्वणत्षट्पद-
स्त्रैणप्रीणितपान्थमुज्ज्वलजलं चक्रे विशालं सरः ॥२६॥

१३१. यस्मिन् महासरसि हंसविलासिनीनां
राजीवराजिरजसा रचितोऽङ्गरागः ।
तद्वीक्ष्य रूक्षमधुना मम सज्जयन्ति
सम्पूरणार्थमिव वारिविलोचनानि ॥२७॥

**अथ मुक्तकम्**

१३२. अभ्युन्नतेऽपि जलदे जगदेकसेक-
साधारणप्रणयहारिणि हा ! यदेते ।
उल्लासलास्यललितं तरवो न यान्ति
हे दावपावक ! स तावक एष दोषः ॥२८॥

१३३. मुग्धं विबोधयतु लोकमशोक एष
शाखाभिरुल्लसितपल्लवपाटलाभिः ।
सा काऽपि पञ्चमचमत्कृतिरभ्युदेति
पुंस्कोकिलैकनिलये पुनरत्र चूते ॥२९॥

१३४. अस्तं गतः स[९] भगवानरविन्दवृन्द-
जीवातुरातुरथाङ्गविबोधबन्धुः ।
दोषाकरः प्रसरतु प्रभवन्तु ताराः
कारानिकेतमिव यातु जगत्तमिस्त्रम् ॥३०॥

१३५. अधस्तादस्ताद्रेः कटकपटलीकुट्टिमतटी[१०]
विटङ्कं निःशङ्कं विशति बिस(सि)नीनां परिशये ।

---

९. रविः इति टिप्पणी । पद्मवनजीविः इति टिप्पणी ।

१०. अस्ताचलशिखरगृहदेशे( शा )न्तरिते रवौ इत्यर्थः इति टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करिग्रामश्यामं मलिनयितुमेतत्त्रिभुवनं
भुवो रन्ध्रादन्धा(न्धं)तमसमहह प्रादुरभवत् ॥३१॥

१३६. येन त्वया भगवतः शतपत्र[11]नाभे-
राजन्मतोऽपि विदधे हृदये निवासः ।
तत्कोऽस्तु कौस्तुभमणीन्द्र ! भवद्गुणौघ-
सब्रह्मचारिचरितः परितः पृथिव्याम् ॥३२॥

१३७. अमी तावद्दावज्वे(ज्व)लनवलनालीढवपुषः
श्रयन्ते न प्रीतिप्रसरमसकृत्केऽपि तरवः ।
अयं यावत् कन्दक्लममथनमत्यन्तविनतो
न तोयप्राग्भारं किरति जलदः स्फीतनिनदः ॥३३॥

१३८. अतीतास्ते लीलाविकचपिकचक्रध्वनिभर-
प्रचारप्रोन्मीलन्मनसि[12]जरसाः केऽपि दिवसाः ।
इदानीं भूपीठं पथिकपदमांस्पाकमहसः
समारम्भादस्मादहह दहति ग्रीष्मसमयः ॥३४॥

अथ सिंहः

१३९. यस्यां स केसरियुवा पदमाबबन्ध
गन्धद्विपेन्द्ररुधिरारुणिताङ्गणायाम् ।
तामद्य कन्दरकुटीं धृतधूम्ररोमा
गोमायुरेष वपुषा कलुषीकरोति ॥३५॥

१४०. तावत्कैरवकोशकुट्टिमकुटीकोणेषु कोलाहल-
व्यालोलामलिमण्डलीं विदधते शीतद्युतेरंशवः ।
ते तन्वन्ति नयाद[था]न्धतमसग्रासोन्मुखां शेमुखीं
देवस्य द्युमणेः कराः कमलिनीकालुष्यकूलङ्कषाः ॥३६॥

१४१. यस्याकर्ण्य वचः सुधाकवलितं वाचंयमानामपि
व्यग्राणि ग्रथयन्ति मन्मथकथां चेतांसि चैत्रोत्सवे ।
रे रे काक ! वराक ! साकमधुना पुंस्कोकिलेन ध्वनि-
स्पर्धाबन्धमुपेयुषस्तव कथं वक्षो न याति द्विधा ॥३७॥

---

११. विष्णोः इति टिप्पणी । १२. सन्ति इति टि० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१४२. कान्तिस्तनोति तुलनामलिनस्तवेयं
धूमाच्च भूतिरपरश्च गुणो न कश्चित् ।
किं तत्तपः कथय कज्जल ! येन कान्ता-
नेत्रोत्पलैरविचलैः परिपीयसे त्वम् ॥३८॥

१४३. जीमूतजालजटिलाः ककुभः कलापि-
वाचालितानि च कदम्बकदम्बकानि ।
मानग्रहग्रहिलताविषमावलेपां
कां नाम वामनयनां न कदर्थयन्ति ॥३९॥

१४४. राजानो रजनीचरा इव परिच्छिद्रे विनिद्रादरा
दारिद्यादिव शङ्किता जलमुचो मुञ्चन्ति नाम्भः क्वचित् ।
उद्वेगादिव दुर्धियां निरगमत्तत्त्वावबोधक्रमः
कः कुर्यादधुना सुधासहचरीं लोके वराके कृपाम् ॥४०॥

१४५. यदासीदासीनं कुचकनककुम्भेषु सुदृशा-
मखण्डश्रीखण्ड इव लहरिलिप्तेषु सुचिरम् ।
इदानीमासाद्य त्रिदशतटिनीतीरविपिनं
तदस्माकं चेतः स्पृशति परमब्रह्मणि लयम् ॥४१॥

१४६. समुत्सार्य च्छायापरिचयमरे चित्त ! वपुषो
जराविर्भावेऽस्मिन् विशति शनकैर्यौवनवनम् ।
सदा नीडक्री(डा?)ति(पि)ककुलकलक्वणसुहृदो
निषेव्यास्ते दिव्याः त्रिदशतटिनीतीरतरवः ॥४२॥

१४७. मालिन्यं भुवनातिशायि रुचिरं नो किञ्चिदप्याकृतौ
धन्यैः पोषणमात्मना विसदृशैस्तत्रापि काकैः किल ।
भ्रातः कोकिल ! सर्वमेतदमृतस्त्रोतस्विनीसोदरे
माधुर्ये भवतो गिरां समधिके निर्नाम निर्मज्जति ॥४३॥

—x—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्लोकानुक्रमणिका


| | | | |
|---|---|---|---|
| अङ्गुष्ठमात्रापि | ११ | इति विविधविभेदे | ९ |
| अचलविमलदृष्टि | ७७ | इति सप्तत्यधिक | २५ |
| अतीतास्ते लीला | १३८ | इत्येवं सर्वसभां | १४ |
| अथ कथमपि जन्तुः | ५ | इमे दन्तक्रीडाकृत | १०८ |
| अथ कथमपि प्रैति | ३ | इह क्रीडोद्याने | ११७ |
| अथ गर्भजपञ्चेन्द्रिय | ६ | इह तथाहि मृगाहि | ७ |
| अथ जातिविशुद्धे | ३१ | इह हि गृहिणां | ४५ |
| अथ भवति मनुष्यः | २३ | इह हि दानफलेन | ६६ |
| अथ लभेत शुभैर्यदि | ४४ | इह हि भूतलवह्नि | २ |
| अद्यैतत् श्वोऽपरेद्युः | ४७ | एतस्मिन्मरुमण्डले | १०३ |
| अधस्तादस्ता- | १३५ | एतस्मिन्विपिने | १२९ |
| अन्यैव सा वसुमती | १२१ | एतस्य भीषणभुजङ्ग | १२६ |
| अपि प्रारम्भेऽस्मिन्न | १०७ | एतेषु चैकमेव हि | २६ |
| अभ्युन्नतेऽपि जलद | १३२ | कमिह जगति पुंस | ८६ |
| अमी तावद्दावज्वलन | १३७ | कलङ्कविकलं कुलं | ५९ |
| अमुष्मिन्नुद्याने | ११८ | क्वापि ज्ञानं दर्शनं | ६९ |
| अमूका मण्डूका | १०६ | कान्तिस्तनोति | १४२ |
| अम्भोधरैः कलुषित | ११० | काशश्वासास्य | ४० |
| अये वन्यस्तम्बेरम | ११३ | कुले विशाले विमले | ३० |
| अरेरे मातङ्ग ग्लपयसि | १०९ | कुशीकुठारासि | ६४ |
| अष्टसहस्रस्तम्भै | १३ | कृशानुतः स्यादपि | ५७ |
| अस्तं गतः स भग | १३४ | केचिज्जिनेन्द्रार्चन | ८५ |
| अहह पश्यत कौतुकं | ३७ | गतः कालो यस्य | १२४ |
| अहो तुल्यप्रेम्णा | १२२ | गर्भे मृत्क्रव्यपीडा | ३३ |
| आराधयामि नृप | ४६ | छन्ने शैवलवल्लीभिः | १९ |
| आलिङ्गितोऽसि | १२८ | जगति यशो हृदि | १०० |
| इति जगति पुमांसः | ५० | जगत्प्रसिद्धेषु फलेषु | ६० |


१३२. सू.मु. ३८.८, शा.प. ११५८ । ११८. सू.मु. ३६.४० शा.प. ८७९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनेन्द्रबिम्बस्य ९३
जीमूतजालजटिल १४३
जीर्णोद्धरणं तथा ८९
ज्ञानादिनिःशेष १०१
ततोऽधिकारी सुविशुद्ध ७८
तथेदमालोक्य जिनेन्द्र ८४
तदपि च भरतैरावत २४
तावत्कैरवकोश १४
तार्णं जीर्णं कुटीरं ४८
तत्रापि चार्यदेशा २७
त्वयि मदमनो ११५
त्रिधा प्रतिष्ठा गदिता ९५
दलं च काष्ठाद्युचितं ८१
दुर्लभमिति मानुष्यं २२
द्विजाय किल कोऽप्य १०
द्वित्रिचतुःपरिणामपरीतैः ४
न काऽप्यवस्था न च ३२
न चोरभिल्लादि ७५
न तेषु दोषानुगतस्य ५३
न त्राणाय कलत्रपुत्र ४१
न यत्र व्यातेनुः १२७
नयार्जितद्रव्यपति ७९
निजकुलगगनशशाङ्कः ८७
निदानहीनं च सदैव ६४
निद्रा ह्यालस्यस्य ५८
निर्धर्मलोके न तुरुष्के ७३
निष्पन्ने सति बिम्बे ९४
नीचासनस्थो विकथा ७७
नो देवेन्द्रा न चेन्द्रा ३४
नैर्मल्यमप्रतिममम्बु १२०
पञ्चकल्याणकादी १०४
पयःपङ्कीभूतं १२५
पिकचकोरमयूर ८
प्रतिदिवसं च शुभाशय ८३
प्रत्याख्यानं साधुषु ७१
प्रियानुकूला कलहेन ६१
बर्बरभिल्लकिरात २८
भवेऽथवैकत्र करोति ५३
मदं यस्याद्याय ११४
मन्त्रैः सतन्त्रै ३५
मन्दाकिनीकनक १११
महार्णविजलान्तर १६
मानुष्यार्यक्षेत्रदेशा १
मालिन्यं भुवनातिशायि १४७
मुक्तिगतदेवतानां ९८
मुग्धं विबोधयतु १३३
यत्सम्पत्त्या न युक्ता ५५
यत्रार्यलोका निवसन्ति ७२
यथा धीरं धीरं रससि १०५
यथाम्भसामास्पद ४३
यथाऽल्पचित्तः स्थपति ९३
यदासीदासीनं १४५
यदि कथंचिदिहार्य- २९
यदीयतीर्थं किल ९६
यस्मिन्महासरसि १३१
यस्याकर्ण्य वचः १४१
यस्यां स केसरियुवा १३९
यात्रामहोत्सवविधि १०३

१४१. शा.प. ८४६ । १३९. शा.प. १२१३ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| यावांस्तु विद्योदित | ८० |
| ये तीर्थनाथागम | १०० |
| येन त्वया भगवतः | १३६ |
| येषां बभार मदम | ११२ |
| रत्नेषु चिन्तामणि | १०२ |
| राजानो रजनीचरा | १४४ |
| वरं बुभुक्षातुरसिंह | ५६ |
| वारांनाथ ! वराटिकामपि | ११९ |
| विक्रीणाति यथेह | ६५ |
| विधिरपि भृतकादी | ८२ |
| शुष्कं रूक्षं क्षुधार्तः | ४९ |
| शैत्यं तोये चलन | ३९ |
| श्रेयांसः प्रथमाय | ६७ |
| सकलजनमनोजं | ९० |
| संघे तत्त्रितयं | ७० |
| सत्कीर्तिवल्लि | ८८ |
| संध्याराग इव | ३६ |
| सप्तत्यधिकजिने | १७ |
| समस्तजगतीगतं | १२ |
| समारम्भि स्मेरा | ११६ |
| समुत्सार्य च्छायापरि | १४६ |
| सविधविविधापायै | ३८ |
| सव्यापसव्यं भ्रमतो | १८ |
| सुखेन लभ्यो | ५१ |
| सुरेण युगसम्ययोः | २० |
| सूरिस्तीर्थं जङ्गमं | ५४ |
| स्तम्भं रत्नमयं | २१ |
| स्थाने च यत्रास्ति | ७४ |
| स्वपुराकृतकर्म | ४२ |
| स्वप्ने विधुं मुखसितं | १७ |
| स्वाधीनं स्वगृहे | ६८ |
| स्वबन्धुभोग्यां | ६२ |
| हंसान्निरस्य वहति स्म | १२३ |
| हृदयविचिन्तित | ११ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# छन्दःसूची

| | | |
|---|---|---|
| अनुष्टुप् | १०४ | १ |
| आर्या | ६, ११, १३, १४, १५, २२, २४, २५, २६, २७, २८, ३१, ४४, ८३, ८७, ८९, ९४, ९७, ९८, ९९ | २० |
| इन्द्रवज्रा | ३५, ५४, ७७, ८०, ८८, ९१, ९६, १००, १०१, १०२ | १० |
| इन्द्रवंशा | ८५ | १ |
| उपजाति | ४, १८, ३०, ३२, ४३, ६३, ६४, ७२, ७३, ७४, ७५, ८१, ९५ | १३ |
| उपेन्द्रवज्रा | ५१, ५२, ६२, ७८ | ४ |
| द्रुतविलंबित | २, ७, ८, २९, ३७, ६६ | ६ |
| पुष्पिताग्रा | ११५ | १ |
| पृथ्वी | १०, १२, १६, २०, ५९ | ५ |
| मन्दाक्रांता | ३९ | १ |
| मालिनी | ५, ९, २३, ५०, ७६, ८२, ८६, ९० | ८ |
| वंशस्थ | ५३, ५६, ५७, ६०, ६१, ७९, ८४, ९२, ९३ | ९ |
| वसंततिलका | १७, ४६, १०३, ११०, १११, ११२, १२०, १२१, १२३, १२६, १२८, १३१, १३२, १३३, १३४, १३६, १३९, १४२, १४३ | १९ |
| शार्दूलविक्रीडित | १९, २१, ३६, ४१, ४२, ४९, ६५, ६७, ६८, ७०, ११९, १२९, १३०, १४०, १४१, १४४, १४७ | १७ |
| शालिनी | १, ६९, ७१ | ३ |
| शिखरिणी | १०५, १०६, १०७, १०८, १०९, ११३, ११४, ११६, ११७, ११८, १२२, १२४, १२५, १२७, १३५, १३७, १३९, १४५, १४६ | १९ |
| स्रग्धरा | ३३, ३४, ४०, ४७, ४८, ५५, ५८ | ७ |
| हरिणी | १, ६९, ७१ | ३ |
| | | १४७ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# बोधप्रदीपः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१. चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयो दशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयं-
श्चेतःसद्मनि योगिनां विजयते बोधप्रदीपो हरः ॥१॥

२. माद्यन्मित्र-कलत्र-पुत्र-कुतपश्रेणीरणच्छृङ्खला-
बन्धध्वस्तगतेर्निरुद्धवपुषः क्रोधादिविद्वेषिभिः ।
आस्तां ज्ञानसुधारसः किमपरं संसारकारागृह-
क्रूरक्रोडनिवासिनो न सुलभा वार्ताऽपि मोक्षं प्रति ॥२॥

३. निद्रामिमां प्रचलमोहमयीमपास्य रे रे जनाः ! कुरुत शाश्वतवस्तुकृत्यम् ।
एते पतन्त्यविरतप्रहारापदेशादायुस्तरोर्निबिडमूलभिदः कुठाराः ॥३॥

४. इतः क्रोधो गृध्रः प्रकटयति पक्षं निजमितः
शृगाली तृष्णेयं विवृतवदना धावति पुरः ।
इतः क्रूरः कामो विचरति पिशाचश्चिरमहो
स्मशानं संसारः क इह पतितः स्थास्यति सुखम् ॥४॥

५. शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते स्थिरमिव स्यूते शुभे कर्मणि ।
छिन्नेऽस्मिन्नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झगिति भ्रश्यद्दिशो दिव्यताम् ॥५॥

६. त्यक्त्वा सङ्गमपारपर्वतगुहागर्भे रहः स्थीयतां
रे रे चित्त ! कुटुम्बपालनविधौ को वाऽधिकारस्तव ।
यस्यैते पुरतः प्रसारितदृशः प्राणप्रियः पश्यतो
नीयन्ते यमकिङ्करैः करतलादाच्छिद्य पुत्रादयः ॥६॥

७. शास्त्रज्ञोऽपि प्रगुणितनयोऽप्याप्तबोधोऽपि बाढं
संसारेऽस्मिन् भवति विरलो भाजनं सद्गतीनाम् ।
येनैतस्मिन्निरयनगरद्वारमुद्घाटयन्ती
वामाक्षीणां भ्रमति कुटिला भ्रूलता कुञ्चिकेव ॥७॥

८. तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरङ्गचक्षुषा ताड्यते चटुललोचनाञ्चलैः ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९. सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथजुषो नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥९॥

१०. कैः कैर्नाऽमरमौलिचुम्बितपदैर्भुक्तास्सुराणां श्रियः
को वाऽन्तर्नरकोदरे न कषितो दुःखैरनन्तैर्भृशम् ।
इत्थं तत्सुख-दुःखयोरपि गतः सर्वप्रकर्षं तथा-
प्यज्ञानावृतचेतसां न हृदयं व्यावर्तते कर्मतः ॥१०॥

११. पाशोऽयं हरिणीदृशां भुजलतापाशः प्रकृष्टो गले-
ष्वन्तर्जीवितनाशिनो रतिपतेर्बाणाश्च बाणा इमे ।
को नैवं किल वेत्ति किन्तु निबिडीभूतः कुतोऽप्यग्रतो-
मुक्तिद्वारपिधानकर्मणि महामोहः कपाटायते ॥११॥

१२. उदितरुदिताक्रन्दं क्वापि क्वचित्कलगीतिकं
क्वचिदुपचितक्रोधद्वन्द्वं क्वचिद्घनमैत्रिकम् ।
क्वचिदपि कृतक्रीडाभोगं क्वचिद् द्रविणार्जन-
व्यथितहृदयं दृष्ट्वा लोके न कोऽत्र विरज्यते ॥१२॥

१३. जानन्त्येके प्रगुणितधियो धर्मकर्मादिशास्त्रं
जानन्त्यन्ये निपुणमतयो वेदसिद्धान्ततत्त्वम् ।
जानन्त्यन्ये सकलमपरे तन्त्र जानन्ति केचि-
ल्लीलालब्धत्रिभुवनजयो जीयते येन मृत्युः ॥१३॥

१४. सा बुद्धिः प्रलयं प्रयातु कुलिशं तस्मिन् श्रुते पात्यतां
वल्गन्तः प्रविशन्तु ते हुतभुजि ज्वालाकराले गुणाः ।
यैः सर्वैः शरदिन्दुकुन्दरुचिभिः प्राप्तैरपि प्राप्यते
भूयोऽप्यत्र पुरन्ध्रिगर्भनरकक्रोडाधिवासव्यथा ॥१४॥

१५. चलति गलितधैर्यः को न मोक्षान्तरालात्
झगिति गवलनीला यत्पुरो वक्रिताङ्गी ।
इयमुपशमरूपं मार्गमाखण्डयन्ती
चलति कुवलयाक्ष्याः सर्पिणी भ्रूलतैव ॥१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६. नानाविधं कृतकदेहभृतां समाजं
यस्मिन् प्रवेशयति कर्मविपाक एषः ।
आस्तत्र विस्तृतरसे भवनाटकेऽस्मिन्
विष्कम्भको भवति नाम न कोऽपि मृत्योः ॥१६॥

१७. आयुर्नीरतरङ्गभङ्गुरमिति ज्ञात्वा सुखेनाऽऽसितं
लक्ष्मीः स्वप्नविनश्वरीति सततं भोगेषु बद्धा रतिः ।
अभ्रस्तम्बविडम्बि यौवनमिति प्रेम्णाऽवगूढाः स्त्रियो
यैरेवाऽत्र विमुच्यते भवरसात्तैरेव बद्धो जनः ॥१७॥

१८. निबद्धा स्थैर्याशा जलशशिनि कल्लोलचटुले
क्षणध्वंसी स्वप्नः सुचिरमविनाशीति कलितः ।
यदेतस्मिन् वातप्रतिहतपताकाग्रतरले
कृता काये प्रीतिः परमपुरुषार्थक्षयकरी ॥१८॥

१९. मा दृश्यतां हृदय ! हन्त तमस्करोऽयमेणीदृशां वदनरूपधरो मृगाङ्कः ।
आच्छाद्य निर्मलविवेकदिशो विसारि यस्मादिदं स्फुरति मोहमहान्धकारम्
॥१९॥

२०. एताः कस्य न विभ्रमार्पितदृशश्चेतो हरन्त्यङ्गनाः
को वाऽस्मिन् पदपीठलोठितनृपे राज्ये निरस्तस्पृहः ।
किं कुर्वन्तु विवेकिनः पुनरहो नक्तन्दिवोज्जृम्भितैः
क्रीडत्कालकरालपाणिपुटकक्रोडे लुठद्विग्रहाः ॥२०॥

२१. दृष्ट्वा दृष्ट्वा प्रफुल्लेक्षणहरिणयुगं वल्गदुद्यानबुद्ध्या
नाभीवल्मीकभीमे वपुषि मृगदृशां ये प्रकुर्वन्ति लीलाम् ।
तेषामुन्निद्रमाद्यन्मदनविषधरग्रासमूर्च्छातुराणां
क्वैते तत्त्वोपदेशाः श्रवणपरिणतिं यान्ति विस्तारिणोऽपि ॥२१॥

२२. विकीर्णहरिचन्दनद्रविणि यत्र लीलालसाः
प्रपेतुरलिचञ्चलाश्चटुलकामिनां दृष्टयः ।
तदेतदुपरि भ्रमन्निबिडगृध्रजालं जनै-
र्लुठत्कृमिकलेवरं पिहितनासिकैर्वीक्ष्यते ॥२२॥

२३. यावज्जरा विषधरीव न मां दुनोति व्याघ्रो न यावदुपसर्पति मृत्युनामा ।
संसारघोरगिरिगह्वरवर्तिनोऽन्तस्तावद्विवेक ! मम दर्शय मुक्तिमार्गम् ॥२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२४. उन्मीलत्त्रिवलीतरङ्गवलया प्रोत्तुङ्गपीनस्तन-
द्वन्द्वेनोद्धतचक्रवाकयुगला वक्त्राम्बुजोद्भासिनी ।
कान्ताकारधरा नदीयमभितः क्रूराऽत्र नाऽपेक्षसे
संसारार्णवमज्जनं यदि ततो दूरेण संत्यजताम् ॥२४॥

२५. सुप्तव्यालिनि शैलरन्ध्रकुहरे दैत्यस्त्रियोऽन्वेषिताः
खातः सोऽपि निशासु निष्ठुरशिलाकूटो निधिश्रद्धया ।
तृष्णे ! देवि ! तथा त्वयाऽस्मि नटितो जानन्नपि प्रत्यहं
किं लोके न ममापि संप्रति यथा दास्येन रुद्धं मुखम् ॥२५॥

२६. वित्तैर्येषां प्रतिपदमियं मण्डिता भूतधात्री
निर्जित्यैतद्भुवनवलयं ये विभुत्वं प्रपन्नाः ।
तेऽप्येतस्मिन् गुरुभवहृदे बुद्बुदस्तम्बलीलां
धृत्वा धृत्वा सपदि विलयं भूभुजः संप्रयाताः ॥२६॥

२७. क्रीडां करिष्यति कियच्चिरमेष हंसः स्निग्धोल्लसत्कलरवोऽत्र शरीरवाप्याम् ।
कालारघट्टघटिकावलिपीयमानमायुर्जलं झगिति शोषमुपैति यत्र ॥२७॥

२८. भूपोऽहं नृपवृन्दसेवितपदः प्राज्ञः सुविद्वानहं
शूरोऽहं निहतद्विषन् मुनिरहं सम्यक् तपस्वीति च ।
मिथ्याहंकृतिमोहिताः कृतमदं जल्पन्त्वमी वस्तुत-
स्तावत्कोऽहमिति प्रगल्भमतयोऽप्यात्माधिबोधे जडाः ॥२८॥

२९. इयं मायारात्रिर्बहलतिमिरा मोहललितैः
कृतज्ञानालोकास्तदिह निपुणं जाग्रत जनाः ।
अलक्ष्यः संहर्तुं ननु तनुभृतां जीवितधना-
न्ययं कालश्चौरो भ्रमति भुवनान्तः प्रतिगृहम् ॥२९॥

३०. स्वार्थारम्भप्रणतशिरसां पक्षपातात्सुराणां
तृप्तात्मानं करजकुलिशैर्दानवेन्द्रं निहन्तुम् ।
सिंहीभूतस्त्रिभुवनगुरुः सोऽपि नारायणोऽस्मिन्
रागद्वेषप्रणिहतमतेः कस्य न स्यात्पशुत्वम् ॥३०॥

३१. न्यस्तो हन्त यदेन्द्रजालविदुषो मोहेन बन्धो दृशां
दृष्टाः काञ्चनचन्द्रचम्पकविशाकारास्तदा योषितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संप्रत्येव विवेकमन्त्रपयसा ध्वस्ते यथावस्थितं
तत्कायेषु वसा-ऽसृगस्थि-पिशितस्तोमादि संलक्ष्यते ॥३१॥

३२. नो सत्येन मृगाङ्क एष वदनीभूतो न चेन्दीवर-
द्वन्द्वं लोचनतां गतं न कनकैरप्यङ्गयष्टिः कृता ।
किन्त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वग्मांसास्थिमयं वपुर्मृगदृशामन्धो जनः सेवते ॥३२॥

३३. नाऽऽलोकयन्ति पुरतः परलोकमार्गं लीलातपत्रपटलावृतदृष्टयो ये ।
तेषामगाधनरकात्मनि मोहितानां घोरान्धकूपकुहरे निकटो निपातः ॥३३॥

३४. येनेह जर्जरितकुञ्जरकुम्भगर्भ-
मुक्ताफलप्रकरकण्टकिता धरित्री ।
संरक्षिता समिति सोऽपि हतान्तकेऽस्मिन्
कुण्ठीभवत्यहह ! भूमिभृतां कृपाणः ॥३४॥

३५. रोगेऽप्यङ्गविभूषणद्युतिरियं शोकेऽपि लोकस्थिति-
र्दारिद्र्येपि गृहं वयःपरिणतावप्यङ्गनासङ्गमः ।
येनाऽन्योन्यविरुद्धमेतदखिलं जानन् जनः कार्यते
सोऽयं सर्वजगज्जयी विजयते व्यामोहमल्लो महान् ॥३५॥

३६. लङ्काभर्तुर्निधनरुचिना चापहस्तेन येन
क्षिप्तास्तास्ताः पितृपतिमुखे कोटयो राक्षसानाम् ।
सोऽयं स्फूर्जद्दिवसरजनीघोरवक्त्रेण राम-
स्ताम्यन्मूर्तिर्झगिति गिलितः कालनक्तंचरेण ॥३६॥

३७. आत्मानं किल मन्यते हतमतिः क्रीडाक्कणत्कङ्कण-
श्रेणीसूचितसंभ्रमं स्मरवशः कान्ताभिरालिङ्गितम् ।
नैवं वेत्ति यदुल्लसद्भुजलतापाशेन बद्ध्वा बला-
देताभिर्गुरुमोहकूपकुहरे क्षिप्तोऽस्मि जानन्नपि ॥३७॥

३८. यैः कान्ताजनविप्रयोगजनितं सन्तापमाविर्भवत्-
कर्पूराक्षमृणालचन्दनरसैरुच्छेदयंस्तिष्ठसि ।
तैरेषाऽपि शमिष्यते तव पुरस्तापप्रचण्डानिल-
ज्वाला पञ्जरसम्भवो यमपुरे तेनाऽस्तचिन्तो भवान् ॥३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३९. विषयविमुखं कृत्वा चेतो निसर्गसुखोन्मुखै-
र्विमलमतिभिर्ध्येयं ज्योतिर्भवार्णवशोषकृत् ।
व्रजति चपले को विश्वासं शरीरजरत्तृण-
प्रणयिनि पयोबिन्दा(न्द्वा?)वर्तप्रपातिनि जीविते ॥३९॥

४०. भृत्योऽहं नृपतिः स एष विजयी मूर्खोऽस्मि विद्वानयं
रूपश्रीसदनं स एव सदृशो नाऽन्यः कुरूपो मया ।
शूद्रोऽहं द्विज एष एष कनकैः कीर्णः सुनिःस्वोऽहमि-
त्यन्तर्मोहकरी नृणां विजयते तृष्णामयी तन्द्रिका ॥४०॥

४१. भ्रातर्मोह ! विमुञ्च खेदमसमं ये राज्यवज्रार्गलं
भित्त्वा धीरधियो वनाय चलितास्तेषां न मल्ले भवान् ।
प्रज्ञाभिर्दृढकर्मपाशवलयच्छेदक्षमास्तद्भयाद्-
दाराद्यैर्बिसतन्तुभिर्निगडितास्तिष्ठन्ति ये ते वयम् ॥४१॥

४२. इह हि मधुरगीतं नृत्यमेतद्रसोऽयं
स्फुरति परिमलोऽसौ स्पर्श एष स्तनानाम् ।
इति हृतपरमार्थैरिन्द्रियैर्भ्राम्यमाणः
स्वहितकरणधूर्तैः पञ्चभिर्वञ्चितोऽस्मि ॥४२॥

४३. यः सर्वैरभिसेव्यते सुकृतिभिर्यस्य प्रसादोद्धतै-
र्दृश्यन्ते दलितप्रभास्तृणमिव क्षोणीश्वराणां श्रियः ।
सन्तोषः स मनस्विनामिह गुरुस्तृष्णासमालिङ्गितं
मामुद्वीक्ष्य कुतोऽपि साम्प्रतमगात्तेनाऽस्मि दुःखाकुलः ॥४३॥

४४. सर्वत्र संचलितभृत्यकरावधूतनिस्त्रिंशपञ्जरविराजितमप्यकस्मात् ।
निर्वाणसिद्धिरसिकाः सुधियस्त्यजन्ति राज्यं विसर्पदसिपत्रमिव क्रमेण
॥४४॥

४५. सम्पत्समुद्धरणमर्थिजनं कृतार्थं संवर्धनं च यशसो निधनं रिपूणाम् ।
कुर्वन्नपि प्रकुरुषे न तदत्र किञ्चित् किञ्चिन्नयेन विहितेन पुनः करोषि ॥४५॥

४६. जातस्त्वं भुवनाधिपो यदि ततः किं सिद्धमेतावता
प्राप्तो वा यदि निःस्वतां विधिवशात्तेनापि किं ते गतम् ।
तस्मात्तोष-विषादबन्धनमिदं व्याधूय संचिन्त्यतां
ज्योतिर्यत्र लयं गतैस्त्रिभुवनेऽप्यात्मा समालोक्यते ॥४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४७. रागो बन्धुजने यदेष यदयं द्वेषश्च विद्वेषिणि
श्रेयः सम्पदि यच्च या च विपदि प्रोत्सर्पिणी वेदना ।
तत्सर्वं विकसद्विवेकवपुषो ज्ञानानलस्येन्धनं
कृत्वोन्मूलय मूलमांसलमपि व्यामोहजाड्यज्वरम् ॥४७॥

४८. एते निसर्गबलिनो दलयन्ति नित्यं
यद्वैरिणः कृतपदा हृदयं मदीयम् ।
एतान्निवारय पुरः किमुपेक्षसे मां
भ्रातर्विवेक ! भवतः शरणं गतोऽस्मि ॥४८॥

४९. विलोक्य व्यालोलं जगति सुहृदां जीवितमनु-
क्षणध्वंसाक्रान्तं सह कमलया यौवनमपि ।
निरातङ्कक्रीडारसरुचिरसारङ्गतनये
न येषामासक्तिर्भवति विपिने तेऽपि कृतिनः ॥४९॥

५०. प्रीतिः कस्मिन् भवति भवति द्वेषबुद्धिश्च कस्मिन्
किं वा कृत्यं भवति किमु वा वस्तुतःस्यादकृत्यम् ।
कोऽहं कोऽन्यो जगति यदिह ध्यानरूपो महीयान्
सर्वत्राऽऽत्मा विपुलमतिभिर्वीक्ष्यते निर्विकल्पैः ॥५०॥

५१. किं वा( ? ) करिष्यत्यहो ! तेषां मायारात्रिस्तमस्विनी ।
येषां बोधप्रदीपेन मुक्तिमार्गः प्रदर्शितः ॥५१॥

## बोधप्रदीपोऽयम् ॥

५२. संसाराटविमध्वनीनविपुलां भ्राम्यंस्त्वमेकाकुलो
धर्मं सार्थपतिं विना भवसि भो ! दुःखौघपात्रं पुनः ।
यस्मात् त्रासकरी जनं मृगयते तस्यां जराराक्षसी
स्वेच्छं वल्गति जीवजीवनह्वि( ह )रो मृत्युश्च पञ्चाननः ॥५२॥

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्लोकानुक्रमणिका


| | |
|---|---|
| आत्मानं किल मन्यते | ३७ |
| आयुर्नीरतरङ्गभङ्ग | १७ |
| इतः क्रोधो गृध्रः | ४ |
| इयं मायारात्रिर्बहल | २९ |
| इह हि मधुरगीतं | ४२ |
| उदितरुदिताक्रन्दं | १२ |
| उन्मीलत्त्रिवली | २४ |
| एताः कस्य न | २० |
| एते निसर्गबलिनो | ४८ |
| किं करिष्यत्यहो | ५१ |
| कैः कैर्नामरमौलि | १० |
| क्रीडां करिष्यति | २७ |
| चलति गलित | १५ |
| चूडोत्तंसितचारु | १ |
| जातस्त्वं भुवनाधिपो | ४६ |
| जानन्त्येके | १२ |
| तावदेव कृतिनाम | ८ |
| त्यक्त्वा सङ्गमपार | ६ |
| दृष्ट्वा दृष्ट्वा प्रफुल्लेक्षण | २१ |
| नानाविधं कृतकदेहभृतां | १६ |
| नालोकयन्ति पुरतः | ३३ |
| निद्रामिमां प्रचलमोहमयी | ३ |
| निबद्ध्वा स्थैर्याशां | १८ |
| नो सत्येन मृगाङ्क | ३२ |
| न्यस्तो हन्त यदेन्द्रजाल | ३१ |
| पाशोऽयं हरिणीदृशां | ११ |
| प्रीतः कस्मिन् भवति | ५० |
| भूपोऽहं नृपवृन्दसेवितः | २८ |
| भृत्योऽहं नृपतिः | ४० |
| भ्रातर्मोह विमुञ्च | ४१ |
| मा दृश्यतां हृदय | १९ |
| माद्यन्मित्रकलत्र | २ |
| यः सर्वैरभिसेव्यते | ४३ |
| यावज्जरा विषधरीव | २३ |
| येनेह जर्जरितकुम्भ | ३४ |
| यैः कान्ताजनविप्रयोग | ३८ |
| रागो बन्धुजने | ४७ |
| रोगेऽप्यङ्गविभूषण | ३५ |
| लङ्काभर्तुर्निधन | ३६ |
| विकीर्णहरिचन्दन | २२ |
| वित्तैर्येषां प्रतिपद | २६ |
| विलोक्य व्यालोलं | ४९ |
| विषयविमुखं कृत्वा | ३९ |
| शास्त्रज्ञोऽपि प्रगुणित | ७ |
| शुभ्रं सद्म सविभ्रमा | ५ |
| संपत्समुद्धरणम | ४५ |
| संसाराटविमध्वनीन | ५२ |
| सन्मार्गे तावदास्ते | ९ |
| सर्वत्र संचलितभृत्य | ४४ |
| सा बुद्धिः प्रलयं प्रयातु | १४ |
| सुप्तव्यालिनि शैलरन्ध्र | २५ |
| स्वार्थारम्भप्रणतशिरसां | ३० |


१७. सू.मु. १३१/४५ । ४. सूमु. १३१/४४ । ४४. वैराग्य १११ । २४. वैराग्य ११० । १०. सू.मु. १३१/४७ । १५. सू.मु. १३१/३१ । १. सूमु. १/६ । १२. सू.मु. १३१/४२. । ८. सू.मु. १३१/३०. ६. सू.मु. १३१/४१ । १८. सू.मु. १३१/४६ । २०. सू.मु. १३१/४० । २२. सू.मु. ९४/१० । ५. शृंगार । ९. शृंगार २६, सू.मु. ५४-१२ । १४. सू.मु. १३१/४८ । २५. सू.मु. १२६/२१ । ३०. सू.मु. १३१/५९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# छन्दःसूची

| | | |
|---|---|---|
| अनुष्टुप् | ५१ | १ |
| पृथ्वी | २२ | १ |
| मन्दाक्रान्ता | ७, १३, २६, ३०, ३६, ५० | ६ |
| मालिनी | १५, ४२ | २ |
| रथोद्धता | ८ | १ |
| वसंततिलका | ३, १६, १९, २३, २७, ३३, ३४, ४४, ४५, ४८ | १० |
| शार्दूलविक्रीडित | १, २, ५, ६, १०, ११, १४, १७, २०, २४, २५, २८, ३१, ३२, ३५, ३७, ३८, ४०, ४१, ४३, ४६, ४७, ५२ | २२+१ |
| शिखरिणी | ४, १८, २९, ४९ | ४ |
| स्रग्धरा | ९, २१ | २ |
| हरिणी | १२, ३९ | २ |
| | | ५२ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सुभाषितरत्नकोशः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सुभाषितरत्नकोशः

## विषयानुक्रमणिका

| | विषय | श्लोकाङ्क | श्लोकसंख्या |
|---|---|---|---|
| १. | धर्माधिकारः | १-६३ | ६३ |
| | [ शिवः ] | १-४ | ४ |
| | गौरी | ५-७ | ३ |
| | विष्णुः | ८-१६ | ९ |
| | सुजनाः | १७-२१ | ५ |
| | दुर्जनः | २२-३० | ९ |
| | कविकाव्यप्रशंसा | ३१-४५ | १५ |
| | उदारपुरुषाः | ४६-६३ | १८ |
| २. | अर्थाधिकारः | ६४-१९७ | १३४ |
| | सामान्यसमासोक्तिः | ६४-६९ | ६ |
| | कूर्मशेषौ | ७०-९४ | २५ |
| | मेघः | ९५-१०९ | १५ |
| | हंसः | ११०-१२३ | १४ |
| | बीभत्सः | १२४-१२९ | ६ |
| | स्त्रीवर्णकम् | १३०-१४४ | १५ |
| | चन्द्रोदयः | १४५-१४६ | २ |
| | विरहिणः | १४७-१५० | ४ |
| | विरहिण्यः | १५१-१५२ | २ |
| | सखीसमालोचनम् | १५३-१५५ | ३ |
| | दूतीवचनानि | १५६-१६३ | ८ |
| | शान्तः | १६४-१७२ | ९ |
| | जातिः | १७३-१९७ | २५ |
| | | | १९७ |
| | अवाच्याः श्लोकाः | ५९, ६८, ८९, ९०, १५८, १६२ | ६ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सुभाषितरत्नकोशः

[ अथ शिवः ]

१. क्षिप्तो हस्तावलग्नः प्रसभमभिहतो व्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतीभिः सास्रनेत्रोत्पलाभिः
कामीवार्द्रापराधः स हरतु दुरितं शाम्भवो वः शराग्निः ॥१॥

२. संध्यायन् प्रणिपत्य लोकपुरतो बद्ध्वाऽञ्जलिर्याचसे
धत्से यच्च नदीं विलज्जशिरसा तन्नाम सोढं मया ।
श्रीर्याताऽमृतमन्थने यदि हरेः कस्माद्विषं भक्षितं
मा स्त्रीलम्पट ! मां स्पृशेत्यभिहितो गौर्या हरः पातु वः ॥२॥

३. एकं योगनिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या जघनस्थले स्तनतटे शृङ्गारभावालसम् ।
अन्यद् दूरविकृष्टचापमदनक्रोधानलोद्दीपिनीं( तं )
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥३॥

४. अच्छिन्नमेखलमलब्धजटोपगूढमप्राप्तचुम्बनमवीक्षितवक्त्रकान्ति ।
कान्ताविमिश्रवपुषः कृतविप्रलम्भसम्भोगसख्यमिव पातु वपुः स्मरारेः
॥४॥

अथ गौर्याः

५. करस्पर्शारम्भात्पुलकितपृथूरोजकलशे
श्रमाम्भो वामार्धे वमति मदनाकूतसुलभम् ।
प्रभोर्वारंवारं कृतसमधिकोद्धूलनविधे
स्तनौ भस्मस्नानं कथमपि समाप्तं विजयते ॥५॥

६. एतत्किं शिरसि स्थितं मम पितुः खण्डं सुधाजन्मनो
लालाटं किमिदं त्रिलोचनमिदं हस्तेऽस्य किं पन्नगाः ।
इत्थं कौञ्चरिपोः क्रमादुपम(ग?)ते दिग्वाससः शूलिनः
प्रश्ने वामकरोपरोधसुभगं देव्याः स्मितं पातु वः ॥६॥

७. गोनाशाय नियोजिता गदरजाः सर्पाय बद्धौषधिः
कण्ठस्थाय विषाय वीर्यमहते पाणौ मणीन् बिभ्रति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भर्तुर्भूतगणाय गोत्रजरतीनिर्दिष्टमन्त्राक्षरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता च वः ॥७॥

अथ विष्णोः

८. किं च्छत्रं किं नु रत्नं तिलकमुत तथा कुण्डलं कौस्तुभो वा
चक्रं वा वारिजं वेत्यमरयुवतिभिर्यद्बलिद्वेषिदेहे ।
ऊर्ध्वं मौलौ ललाटे श्रवसि हृदि करे नाभिदेशं च दृष्टं
पायात्तद्वोऽर्कबिम्बं स च दनुजरिपुर्वर्धमानः क्रमेण ॥८॥

९. सेयं द्यौस्तदिदं शशाङ्कदिनकृच्चिह्नं नभः सा क्षिति-
स्तत्पातालतलं त एव गिरयस्तेऽम्भोधरास्ता दिशः ।
इत्थं नाभिविनिर्गतेन सशिरःकम्पं पुनर्वेधसा
यस्याऽन्तश्च बहिश्च दृष्टमखिलं त्रैलोक्यमव्यात् स वः ॥९॥

१०. कुतस्त्वमणुकः, स्वतः, स्वमिति किं, न यत् कस्यचित्
किमिच्छसि, पदत्रयं, ननु भुवा किमित्यल्पया ।
द्विजस्य शमिनो मम त्रिभुवनं तदित्याशयो
हरेर्जयति निह्नुतः प्रकटितश्च वक्रोक्तिभिः ॥१०॥

११. भ्राम्यन्मन्दरकन्दरोदरदरीव्यावृत्तिभिर्वारिधेः
कल्लोलैरलमाकुलं कलयतो लक्ष्म्या मुखाम्भोरुहम् ।
औत्सुक्यात्तरलाः स्मराद्विकसिता भीत्या समाकुञ्चिता
व्रीडान्मन्थरिता मदान्मुकुलिता शौरेर्दृशः पान्तु वः ॥११॥

१२. ब्रह्माण्डच्छत्रदण्डः शतधृतिभुवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चक्राक्षदण्डस्त्रिभुवनभवनस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्चैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥१२॥

१३. हृदयं कौस्तुभोद्भासि विष्णोः पुष्णातु वः श्रियम् ।
राधाप्रवेशरोधाय दत्तमुद्रमिव श्रिया ॥१३॥

१४. मन्था मन्दरभूधरः फणिपतिर्नेत्रं नवं वासुकि-
र्मन्दीरा हरिबाहवो निधिरपामामन्थना कर्करी ।
यस्येत्थं जनने सुरासुरजने क्लृप्तः प्रपञ्चक्रमः
पायाद्वो हिमदीधितिः स भगवान् हैयङ्गवीनायितः ॥१४॥

१५. अवतु वः सवितुस्तुरगावली-स्फुरितमध्यगतारुणनायका ।
समभिलङ्घिततुङ्गपयोधरा मरकतैकलतेव नभःश्रियः ॥१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६. ते वः पान्तु विलोलकालकलितास्तारापतिस्पर्धिनः
सन्ध्यावन्दनसंभ्रमे भगवतो धातुः पयोबिन्दवः ।
यैरूर्ध्वं विततैर्वहन्त्युदधयः श्वभ्रावशेषं वपु-
र्व्यावृत्तेश्च जगन्ति बुद्बुदनिभान्युद्यन्ति मज्जन्ति च ॥१६॥

अथ सुजनाः

१७. रागिणि नलिने लक्ष्मीं दिवसो विदधाति दिनकरप्रभवाम् ।
अनपेक्षितदोषगुणः परोपकारः सतां व्यसनम् ॥१७॥

१८. कुसुमान्यञ्जलिस्थानि वासयन्ति करद्वयम् ।
प्रायः सुमनसां वृत्तिर्वाम-दक्षिणयोः समा ॥१८॥

१९. असङ्ख्यैरपि नात्मीयैः स्वल्पैरपि परिस्थितैः ।
गुणैः सन्तः प्रहृष्यन्ते चित्रमेषां विचेष्टितम् ॥१९॥

२०. यदमी दशन्ति दशनारसनां तत्स्वादुसुखमवाप्नोति ।
प्रकृतिरियं धवलानां क्लिश्यन्ति यदन्यकार्येषु ॥२०॥

२१. अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
सदा लोकहितासक्ता रत्नदीपा इवोत्तमाः ॥२१॥

अथ दुर्जनः

२२. ऋजुरेष पक्षवानिति काण्डे प्रीतिं खले च मा कार्षीः ।
प्रायेण त्यक्तगुणः फलेन हृदयं विदारयति ॥२२॥

२३. अनुहरतः खलसुजनावग्रिमपाश्चात्यभागयोः शू(सू?)च्या ।
एकः कुरुते छिद्रं गुणवानन्यस्तु विदधाति ॥२३॥

२४. अधोमुखमसाधूनामुत्तानं साधुचेतसाम् ।
शरावमनुकुर्वन्ति प्रीतयः सर्वदेहिनाम् ॥२४॥

२५. समर्पिताः कस्य न तेन दोषा हठाद्गुणा वा न हृताः खलेन ।
तथापि दोषैर्न विमुच्यतेऽसौ स्पृष्टोऽपि नैकेन गुणेन चित्रम् ॥२५॥

२६. आत्मनाशाय नोन्नत्यै छिद्रेण परिपूर्णता ।
भूयो भूयो घटीपात्रं निमज्जत् किं न पश्यसि ? ॥२६॥

२७. हृष्यन्ति चारुचरितैः सुजनस्य सत( न्तः )
क्षुद्रत्वमाशु पिशुनाः अपि संत्यजन्ति ।
रत्नं न केवलमलङ्करणाय लोके
क्रूरग्रहादिशमकं च भवेत् प्रभावैः ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२८. निधानीभूतमात्सर्यमन्तर्नीचस्य तिष्ठति ।
परश्लाघासु येनाऽस्य दृश्यते मुद्रितं मुखम् ॥२८॥

२९. अकलितपरस्वरूपः स्वकमपि दोषं परस्थितं वेत्ति ।
नावि स्थितस्तटस्थानचलानपि विचलतो मनुते ॥२९॥

३०. स्नेहेन भूतिदानेन कृतः स्वच्छोऽपि दुर्जनः ।
दर्पणश्चाऽन्तिके तिष्ठन् करोत्येकमपि द्विधा ॥३०॥

कस्यापि ॥ इति दुर्जनपद्धतिः ।

अथ कविकाव्यप्रशंसा

३१. स्तोकाऽपि वन्द्यते लोकैः कस्यापि सुकवेः कृतिः ।
कलेव हरिणाङ्कस्य स्फुरन्ती नवरेखया ॥३१॥

३२. वर्णोत्कर्षप्रचारज्ञाः सञ्चरन्ति गृहे गृहे ।
वार्त्तिकेन्द्राः कवीन्द्राश्च बध्नन्ति विरला रसम् ॥३२॥

३३. कवयः कालिदासाद्याः कवयो वयमप्यमी ।
पर्वते परमाणौ च पदार्थत्वं व्यवस्थितम् ॥३३॥

३४. को न हर्षवशं याति कृत्वा रत्नावलीं हृदि ।
त्रिविक्रमपदन्यासैः स्पर्धां के गवि कुर्वते ॥३४॥

३५. तावत्कविविहङ्गानां ध्वनिर्लोके प्रशस्यते ।
यावन्नो विशति श्रोत्रे मयूरमधुरध्वनिः ॥३५॥

३६. अपारे संसारे कविरेकः प्रजापतिः ।
यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते ॥३६॥

३७. यन्नेत्रैस्त्रिभिरीक्षते न गिरिशो नाऽष्टाभिरप्यब्जभूः
स्कन्दो द्वादशभिर्न च( ? ) मघवा चक्षुःसहस्रेण वा ।
संभूयापि जगत्त्रयस्य नयनैर्द्रष्टुं न यत् पार्यते
प्रत्याहृत्य दृशो समाहृतधियः पश्यन्ति य( त? )त्पण्डिताः ॥३७॥

३८. केचिद्वस्तुनि नो वाचि केचिद्वाचि न वस्तुनि ।
वाचि वस्तुनि चाऽप्यन्ये नाऽन्ये वाचि न वस्तुनि ॥३८॥

सुवणरेखस्य ।

३९. वरं मौनेन नीयन्ते कोकिलैरिव वासराः ।
यावत्सर्वजनानन्ददायिनी वाक् प्रवर्तते ॥३९॥

४०. न स शब्दो न तद्वाक्यं न स त्यागो न सा कला ।
जायन्ते यन्न काव्याङ्गमहो भारो गुरुः कवेः ॥४०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४१. जयत्यन्यः स कोऽप्यध्वा भारत्याः खमिवाऽमलः ।
क्षुण्णोऽपि विबुधैर्बाढं विभात्यक्षुण्ण एव यः ॥४१॥

४२. अनुद्घुष्टः शब्दैरथ च घटनातः स्फुटतरः
पदानामर्थात्मा रमयति न तूत्तानितरसः ।
यथा दृश्यः किञ्चित्पवनचलचीनांशुकतया
कुचाभोगः स्त्रीणां हरति न तथोन्मुद्रितमुखः ॥४२॥

४३. परिच्छिन्नास्वादोऽमृतमधुगुडक्षौद्रपयसां
कदाचिच्चाऽभ्यासाद्व्रजति ननु वैरस्यमधिकम् ।
प्रियाबिम्बोष्ठे वा चतुरकविकाव्येऽप्यनवधि-
र्नवानन्दः कोऽपि स्फुरति तु रसोऽसौ निरुपमः ॥४३॥

४४. श्रोता यैर्नैव योगीव देवरूपो न यै रिपुः ।
यैरात्मसदृशो नाऽर्थी किं तैः काव्यैर्बलैर्धनैः ॥४४॥

४५. ददतो युध्यमानस्य पठतः पुलको न चेत् ।
आत्मनश्च परेषां च धिक् त्यागं पौरुषं वचः ॥४५॥

उदारपुरुषाः

४६. भुङ्क्ते तस्यैव संप्रीतिर्दत्ते तस्येतरस्य वा ।
इहैव तावद्दानस्य भोगाद् द्विगुणमन्तरम् ॥४६॥

४७. ब्रह्माण्डोदरगोलकं कियदिदं तत्रापि भूगोलकं
पृथ्वीमण्डलसंज्ञकं कुपतयस्तत्राप्यमी कोटिशः ।
तत्रैके गुरुगर्वगद्गदगिरो विश्राणयन्त्यर्थिनां
हा हा हन्त वयं तु वज्रघटितास्तानेव याचेमहि ॥४७॥

४८. दिग्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा साऽपि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाऽद्भुतमिदं यत्रैव चाऽस्तं गतम् ॥४८॥

४९. अखर्वपर्वगर्तासु विच्छिन्नो यस्य वारिधेः ।
ही स एव मुनेः पाणिरधस्ताद्विन्ध्यभूभृतः ॥४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५०. आशावलम्बोपचिता न कस्य तृष्णालताऽनर्थफलं प्रसूते ।
दिने दिने लब्धरुचिर्विवस्वान् मीनं च मेषं च वृषं च भुङ्क्ते ॥५०॥

५१. मनः श( स? )क्तुकणोत्तानमणुनैराश्ययन्त्रितम् ।
आशास्पर्शोरुदुष्पूरमपि ब्रह्माण्डकोटिभिः ॥५१॥

५२. विद्यावानपि जन्मवानपि तथा युक्तोऽपि चाऽन्यैर्गुणै-
र्यन्नाप्नोति मनः समीहितफलं दैवस्य सा वाच्यता ।
एतावत्तु हृदि व्यथां वितनुते यत्कुत्सितैः कर्मभि-
र्लक्ष्मीं प्राप्य जडोऽप्यसाधुरपि च स्वां योग्यतां मन्यते ॥५२॥

५३. हन्त चिन्तामणिभ्रान्त्या याचितोऽसि स्तुतोऽसि यत् ।
तत्सर्वं वृत्तपाषाण ! क्षम्यतामर्थिनो वयम् ॥५३॥

५४. मा रोदीश्चिरमेहि वत्स ! विफलं दृष्ट्वाऽद्य पुत्रानिमा-
नायातो भवतेऽपि दास्यति पिता ग्रैवेयकं वाससी ।
श्रुत्वैवं गृहिणीवचांसि निकटे कुड्यस्य निष्कञ्चनो
निःश्वस्याऽश्रुजलप्लवप्लुतमुखः पान्थः पुनः प्रोषितः ॥५४॥

५५. दारिद्याय नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
जगत्पश्यामि येनाऽहं न मां पश्यति कश्चन ॥५५॥

५६. गाढतरबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य ।
कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ॥५६॥

५७. उदारचरितात् त्यागी याचितः कृपणोऽधिकम् ।
एको दत्ते धनं प्राणानन्यः प्राणांस्ततो धनम् ॥५७॥

५८. शिरः संख्यस्पर्धि ध्वनिरपि पवर्गं मृगयते ।
तमःक्षुण्णं चक्षुः करचरणसाकम्पतरलम् ।
उदस्थित्वमूर्ध्वं( ? ) ध्वनिति च जराजर्जरमुरः
स्फुरत्यन्तः कोऽपि द्रविणलवलोभव्यतिकरः ॥५८॥

५९. ..... प्याकारविभ्रमः ॥५९॥

---

५९. लेखनस्य लुप्तत्वादवाच्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६०. नातिनिर्मत्सरा एव कुर्वन्ति च यथोचितम् ।
कोऽप्येष महतां हन्त गाम्भी[र्यं]नु गुणो गुणः ॥६०॥

६१. येषां मनांसि करुणारसरञ्जितानि येषां वचांसि परदोषविवर्जितानि ।
येषां धनानि सकलार्थिजनाश्रितानि तेषां कृते वहति कूर्मपतिर्धरित्रीम्
॥६१॥

६२. आः कष्टं किल तावदेतदपि यद्दौःस्थ्यं जने श्रूयते
तत्रापि स्वगृहागतं निजदृशोर्द्वन्द्वेन यद् दृश्यते ।
अन्यत्तत्पुनरत्र दुःसहतरं यद् दैन( न्य )मालम्ब्यते
तस्मात् किन्न कठोर ! हा ! हृदय रे ! द्वेधा त्वया भिद्यते ॥६२॥

६३. व्रजत व्रजत प्राणा अर्थिनि व्यर्थतां गते ।
पश्चादपि हि गन्तव्यं क्व सार्थ : पुनरीदृशः ॥६३॥

इति परमशैवभट्टारकमहापण्डिताचार्यराजगुरुश्रीमन्मुम्मुणिदेवविरचिते सरस्वतीसर्वस्वकोशाभिधाने सुभाषितरत्नकोशे धर्माधिकारकः प्रथम बोधकः ।

अत्रार्थाधिकारे सामान्यसमासोक्तिः ।

६४. माधुर्यादतिशैत्यतः शुचितया सन्तोषशान्त्या तृषः
स्थाने मैत्रमिदं पयः पय इति क्षीरस्य नीरस्य च ।
तत्राप्यर्णसि वर्णना स्फुरति मे यत्सङ्गतौ वर्धते
दुग्धं येन शुचेव चाऽस्य सुहृदः क्वथे स्वयं क्षीयते ॥१॥ कस्यापि

६५. को हि तुलामधिरोहति शुचिना दुग्धेन सहजमधुरेण ।
तप्तं विकृर्ति क्षुग्धं(विकृति क्षुब्धं?) केवलमुद्गिरति यत्स्नेहम् ॥२॥

६६. वामन ! फलमत्युच्चात्तरुतो मरुतोपनीतमासाद्य ।
युक्तं तद्यत्ति(त्तृ)प्यसि दृप्यसि चेत्तत्र हास्यकरी ॥३॥

६७. निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
न शाले सालम्बो लवमपि लवङ्गे न रमते ।
प्रियङ्गौ नासङ्गं रचयति न चूते विचरति
स्मरन् लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥४॥

६८. ..... परेषां ..... ॥५॥ .....

---

६८. अवाच्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६९. सुवर्णकार ! श्रवणोचितानि वस्तूनि विक्रेतुमिहागतस्त्वम् ।
कुतोऽपि नाऽश्रावि यदत्र पल्ल्यां पल्लीपतिर्यावदविद्धकर्णः ॥६॥
कयोरपि ॥

इति सामान्यसमासोक्तिपद्धतिः ॥

७०. वमतु गिरिशाघृष्टे गर्जत्वपश्रुति सागरो
दहतु विततज्वालालालो जगन्ति विषानलः ।
स तु विनिहितग्रीवाकाण्डः कडाहपुटाभरे
स्वपिति भगवान् कूर्मो निद्राभरालसलोचनः ॥७॥

७१. महिम्ना नागेशं तुलयितुमलं कस्तमखिलं
प्रभुध्यानाभ्यासस्थिरपरिकराचार्यकगुरुम् ।
महीभारोद्धारे क्षमफणभृतो यस्य कमला-
पतिः क्रोडे स्थित्वा भुवनभृतिखेदं रहयति ॥८॥

७२. हे कूर्मराज ! परमं कमलासनस्य
विश्वोपरि स्थितिनिमित्तमसि त्वमेव ।
नो चेत्त्वयि प्रचलति क्व तलं क्व धात्री
क्वाशागजाः क्व गिरयः क्व सुराधिवासः ॥९॥

७३. त्वं जातोऽसि चतुष्पथे यदि घनं छन्नोऽसि किं छायया ?
छन्नश्चेत् फलितोऽसि किं ? यदि फलैः पूर्णोऽसि किं सन्नतः ? ।
हे सद्वृक्ष ! सहस्व संप्रति सखे ! शाखाशिखाकर्षण-
क्षोभामोटन[भञ्]जनानि जनतः स्वैरेव दुचेष्टितैः ॥१०॥

७४. नदीतीरे शाखिन्नुपचिततरङ्गाग्रशकलै-
र्मुहुर्मूले सिक्तः कलयसि दलाडम्बरमिदम् ।
न चैवं जानीषे सरल ! यदयं लूनधरणिः
सुखस्पर्शच्छन्नो गुरुपतनहेतुव्यतिकरः ॥११॥

७५ भ्रातश्चन्दन ! किं ब्रवीमि विकटस्फूर्जत्फणाभीषणा
गन्धस्यापि महाविषाः फणभृतो गुप्त्यै यदेते कृताः ।
दैवात् पुष्प-फलान्वितो यदि भवानत्राऽभविष्यत्तदा
नो जाने किमकल्पयिष्यदधिकं रक्षार्थमस्याऽऽत्मनः ॥१२॥

७६. स्थानाद् भ्रष्टः पयसि पतितश्चन्दनो वारिराशे-
स्तैस्तैर्वेलाव्यतिकरशतैर्घूर्णितस्तत्र तत्र ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लग्नः पल्लीवनभुवि गतोऽङ्गारकारस्य हस्तं
न्यस्तो वह्नौ निरवधिरहो दैवगत्या विपत्तिः ॥१३॥

७७. न्यग्रोधे फलशालिनि स्फुटरसं किञ्चित् फलं पच्यते
बीजान्यङ्कुरगोचराणि कतिचित् सिध्यन्ति तस्मिन्नपि ।
एकस्तेष्वपि कश्चिदङ्कुरवरो बध्नाति तामुन्नतिं
यामध्वन्यजनः स्वमात[र]मिव क्लान्तिच्छिदे धावति ॥१४॥

७८. उत्तंसकौतुकरसेन विलासिनीनां लूनानि यस्य न नखैरपि पल्लवानि ।
उद्यानमण्डनतरो ! सहकार ! स त्वमङ्गारकारकरगोचरतां गतोऽसि
॥१५॥

७९. यत्पूर्वमीषदपमुद्रदशां गतस्य चञ्चद् द्विरेफकुलजीवितसौरभं ते ।
दूरं विकस्वरविभूतिमतस्तदद्य हा हन्त जातिकुसुम! क्व गतं न जाने ॥१६॥

८०. मुखे यद्वैरस्यं वपुरपि बहुग्रन्थिनिचितं
न सन्तप्तः कोऽपि क्षणमिव भजेन्मूलमभितः ।
फलं नैव प्राप्य वितथसरलिम्नश्च भवता-
स्तदिक्षो !-नायुक्तंविहितमितरैर्यत्र दलनम् ॥१७॥

८१. मदोष्मासंतापाद्वनजकरिणां यत्र निवहा
ममज्जुर्निःशेषं तटनिकट एवोन्नतकराः ।
गते दैवाच्छोषं वरसरसि तत्रैव तरला
बकग्रासत्रासाद्विशति शफरी पङ्कमधुना ॥१८॥

८२. स्तोकाम्भःपरिवर्तितान्तशफरग्रासार्थिनः सर्वतो
लप्स्यन्ते बक-टिट्टिभप्रभृतयस्तल्लेषु साधुस्थितिम् ।
सद्यः शोषमुपागतेऽद्य सरसि श्रीपद्मपद्माकरे
तस्मिन् पङ्कजिनीविलासरुचयो हंसाः क्व यास्यन्त्यमी ? ॥१९॥

८३. नालस्य प्रसरो जडेष्वपि कृतावासस्य कोशे रुचि-
र्दण्डे कर्कशता मुखेऽतिमृदुता मित्रे महान् प्रश्रयः ।
आमूलं गुणसंग्रहव्यसनिता द्वेषश्च दोषाकरे
यस्यैषा स्थितिरम्बुजस्य वसतिर्युक्तैव तत्र श्रियः ॥२०॥

८४. शीतज्योतिः-सुरतरु-सुधा-कौस्तुभाद्याः पयोधे-
र्यस्मिन्नन्तःकृतवसतयो हन्त नाऽयं स कालः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्वालावत्तैर्भुवनवलयप्लोषबद्धाभिलाषः
संप्रत्यस्य स्फुरति हृदये केवलं वाडवाग्निः ॥२१॥

८५. स्वस्त्यस्तु विद्रुमवनाय नमो मणिभ्यः
कल्याणिनी भवतु मौक्तिकशुक्तिमाला ।
प्राप्तं मया सकलमेव फलं पयोधे-
र्यद्दारुणैर्जलचरैर्न विदारितोऽस्मि ॥२२॥

८६. यच्चन्द्रार्धविभूषणः पशुपतिर्यच्च श्रियाऽलङ्कृतो
विष्णुर्यत् त्रिदिवौकसां पतिरभूदैरावणाधिष्ठितः ।
प्राप्तं प्रीतिविकासितेक्षणयुगैर्यच्चाऽमरत्वं सुरै-
स्तत्सर्वं हि परोपकारवसतेः सिन्धोः प्रभावाद्भुतम् ॥२३॥

८७. एतस्मिन्पदके प्रधानपदवीन्यासेन वर्णोज्ज्वलं
त्वामुत्सार्य सुवृत्तमाप्तविभवो यन्नील एष स्थितः ।
आस्तत्रैव न किं भवन्नपि भवान् मुक्तामणे ! तत्किल
भ्रातः ! संकटशुक्तिकीटकपुटीगर्भे विलीनो भवान् ॥२४॥

८८. केनासीनः सुखमकरुणेनाऽकरादुद्धृतस्त्वं
विक्रेतुं वा समभिलषितः केन देशान्तरेऽस्मिन् ।
यस्मिन्वित्तव्ययभरसहो ग्राहकस्तावदास्तां
नास्ति भ्रातर्मरकतमणे ! त्वत्परीक्षाक्षमोऽपि ॥२५॥

८९. .................... ॥२६॥

९०. ................ पोतायते ॥२७॥

९१. यत्पादाः शिरसा न केन विधृताः पृथ्वीभृतां दैवत-
स्तस्मिन्भास्वति राहुणा कवलिते लोकत्रयीचक्षुषि ।
खद्योतैः स्फुरितं तमोभिरुदितं ताराभिरुज्जृम्भितं
घूकैरुत्थितमाः ! किमत्र करवै किं किं न कैश्चेष्टितम् ॥२८॥

९२. तेजोऽन्यदेव नक्षत्र-शशाङ्क-शकलादिषु ।
उद्घाटितजगत्कोशमन्यदेव रवेर्महः ॥२९॥

९३. अविरलगवलमलीमसबलाहकव्यूहपिहितरविबिम्बम् ।
तदपि न रजनीसदृशं दिनमिति महसामहो ! महिमा ॥३०॥

---

८९-९०. लेखनस्य लुप्तत्वादवाच्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९४. दोषाकरत्वाद्यदि वा जडत्वात् यद्बाल एवाऽप्रगुणोऽयमासीत् ।
अस्माभिरस्मात्प्रतिबोधितोऽयं भविष्यतीन्दोः प्रचुरः कलङ्कः ॥३१॥

अथ मेघः

९५. यत्तद्गर्जितमूर्जितं यदपि च प्रोद्दामसौदामिनी-
दामाडम्बरमम्बरे विरचितं यद् दूरमत्युन्नतम् ।
तेषां पर्यवसानमीदृशमहो ! जातं यदम्भोधर !
द्वित्राः कृत्रिमरोदनाश्रुतनवः क्षिप्ताः पयोबिन्दवः ॥३२॥

९६. अमुं कालक्षेपं त्यज जलद ! गम्भीरमधुरैः
किमेभिर्निर्घोषैः सृज झगिति झात्कारि सलिलम् ।
अये ! पश्याऽवस्थामकरुणसमीरव्यतिकर-
ज्वलद्दावज्वालावलिजटिलमूर्तेर्विटपिनः ॥३३॥

९७. हे मेघ ! मानसहितस्य तृषातुरस्य
जन्मान्तरेऽपि भवदेकपरायणस्य ।
अम्भःकणान् कतिचिदप्यधुना विमुञ्च
नो चेद् भविष्यति जलाञ्जलिरस्य देयः ॥३४॥

९८. यानि त्वत्प्रार्थनाखिन्नैः पीतान्यश्रूणि चातकैः ।
सन्ति तान्यपि नेदानीं क्षैण्यान्मेघ ! किमुच्यते ? ॥३५॥

९९. प्रसीद प्रारम्भाद्विरम विनयेथाः क्रुधमिमां
हरे ! जीमूतानां ध्वनिरयमुदीर्णो न करिणाम् ।
असंज्ञाः खल्वेते जलशिखिमरुद्धूमनिचयाः
प्रकृत्या गर्जन्ति त्वयि तु भुवनं निर्मदमिदम् ॥३६॥

१००. यस्याऽवन्ध्यरुषः प्रतापवसतेर्नादेन धैर्यद्रुहा
शुष्यन्ते समह(द)प्रवाहसरितः सद्योऽपि दिग्दन्तिनाम् ।
दैवात्कष्टदशावशं गतवतः सिंहस्य तस्याधुना
कर्षत्येष करेण केसरसटाभारं जरत्कुञ्जरः ॥३७॥

१०१. मृगेभ्यो रक्ष्यते क्षेत्रं तृणपूली मनुष्यकैः ।
मदकेशरिणाऽऽक्रान्तं न गजैर्न च वाजिभिः ॥३८॥

१०२. शौर्यं हि कोल-कुक्कुर-कृकवाकुकुलेषु दृश्यते बहुषु ।
दानं पुनरिह महतां प्रवर्तते दन्तिनामेव ॥३९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१०३. गतवति चिरं यूथाधीशे जरत्करिणीगणे
नवमदपयोबिन्दून् दृष्ट्वा सुतस्य कपोलयोः ।
प्रतिगजकुलाक्रान्ते तस्मिन् चिरन्तनकानने
कतिपयदिनैः क्रीडां कर्तुं कृतो हृदि संभ्रमः ॥४०॥

१०४. शबरशिबिरीभूते कालक्रमेण तपोवने
वनचरभयात् त्रस्तो गन्तुं वनान्तरमीहते ।
चिरपरिचयात् तच्च त्यक्तुं सहो न भवत्यहो !
मुनिवरमृगश्चिन्तामग्नो न याति न तिष्ठति ॥४१॥

१०५. आदाय मांसमखिलं स्तनवर्जमङ्गे
मां मुञ्च वागुरिक ! यामि कुरु प्रसादम् ।
सीदन्ति शष्पकवलग्रहणानभिज्ञा
मन्मार्गवीक्षणकराः शिशवो मदीयाः ॥४२॥

१०६. न शम्भोरम्भोजैश्चरणयुगपूजास्ति रचिता
मृणालैर्न म्लानं स्मरविधुरबालावलयितैः ।
न पत्रैर्निस्तीर्णो दयितविरहायल्लकविधिः
परं मातङ्गैस्ते वननलिनि ! लक्ष्मीर्विलुलिता ॥४३॥

१०७. मालिन्यं भुवनातिशायि रुचिरं नो किञ्चिदप्याकृता-
वन्यैः पोषणमात्मनो विसदृशैस्तत्रापि काकैः किल ।
भ्रातः ! कोकिल ! सर्वमेतदमृतश्रोतस्विनीसोदरे
माधुर्ये भवतो गिरां समधिके निर्नाम निर्मज्जति ॥४४॥

१०८. पक्षी सूक्ष्मतनुस्त्वमम्बरशिरःसञ्चारदूरस्थिति-
स्तद्गन्तुं न हि पार्यते न च परिक्षीणः स्वरः श्रूयते ।
तस्मान्मेघ ! निदाघदाहविधुरस्त्यक्तान्यनीराशयः
स्मर्तव्योऽयमशेषविश्वभरणव्यग्र ! त्वया चातकः ॥४५॥

१०९. हा धिक् परव्यसनदुर्ललिताशयेन
केनापि रे सरल ! चातक ! वञ्चितोऽसि ।
येनाऽम्बुवाहमपि याचसि याचितस्य
यस्याऽस्य याचितुरिवाऽऽस्यमलीमसत्वम् ॥४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ हंसः

११०. नद्यो नीररता दुरापपयसः कूपाः पयोराशयः
क्षारा दुष्टबकोटसंकटतटोद्देशास्तडागादयः ।
भ्रान्त्वा भूतलमाकलय्य सकलानम्भोनिवेशानिति
त्वां भो मानस ! संस्मरन् पुनरसौ हंसः समभ्यागतः ॥४७॥

१११. हे हंस ! मीलितपयः सलिलं विवेक्तुं
सक्तस्य सम्प्रति मतिः क्व नु तेऽद्य जाता ।
कासारवारिणि कलां पतितां यदिन्दो-
रादातुमिच्छसि बिशाङ्कुरशङ्कया त्वम् ॥४८॥

११२. यत्सौधशृङ्गारसरोजरागरत्नप्रभाविच्छुरितः शशाङ्कः ।
जगाम रोषादिव लोहितत्वं पौराङ्गनावक्त्रकृतापमानः ॥४९॥

११३. शीतांशुबिम्बबहलद्युतितस्करेण कान्तामुखेन सुखितं मम चित्तरत्नम् ।
पुष्पेषुराजवचनेन मतं द्विजानां नूनं करोम्यधरखण्डनदण्डमस्य ॥५०॥

११४. आत्ते सीमन्तचिह्ने मरकतिनि हृते हेमताडङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन् ! गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥५१॥

११५. नातीतः पान्थः ! पन्था व्रजति ननु कथं स्थावरं वर्त्म मुग्धे !
मार्गं पृच्छामि पृच्छ स्थितमिदमिह ते विस्मितं वीक्ष्यतेऽत्र ।
अध्वानं ब्रूह्यये ! नाऽध्वनि भवति वचश्चित्रमित्थं वचोभि-
र्हस्यन्ते दावमूढाः पथि पथिकविटैस्त्वद्द्विषो नाथ ! नार्यः ॥५२॥

११६. पन्थाः ! संहर दीर्घतां त्यज निजं तेजः कठोरं रवेः(वे!)
बन्धो ! विन्ध्यगिरे ! प्रसीद सदयं सद्यः समीपे भव ।
इत्थं दूरपलायनक्लमवतीर्दृष्ट्वा निजप्रेयसीः
श्रीकीर्तीश ! तव द्विषः प्रतिपदं जल्पन्ति मूर्च्छन्ति च ॥५३॥

११७. अभ्युद्धृता वसुमती दलितं रिपूणां
चक्रं तथा कवलिता रिपुराजलक्ष्मीः ।
एकत्र जन्मनि कृतं तदनेन यूना
जन्मत्रये यदकरोत् पुरुषः पुराणः ॥५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११८. कान्ताऽस्मद्दैवगत्या कथमपि गलितान्यन्तरालोत्थपक्षा-
ण्युड्डीयोड्डीय भूयस्तरुशिखरशिखामेव तान्याश्रयन्ते ।
इत्थं त्वद्वैरिनारी गिरिषु नरपते ! जम्बुलुम्बीकदम्ब-
भ्रान्त्या भर्तुर्बुभुक्षोः कथयति पुरतश्चेष्टितं षट्पदानाम् ॥५५॥

११९. बहिः सर्वाकारप्रकृतिरमणीयं व्यवहरन्
पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति ।
जनं विद्वानेकः सकलमतिसन्धाय कपटै-
स्तटस्थः स्वानर्थान् घटयति च मौनं च कुरुते ॥५६॥

[मालतीमाधव १.१४]

१२०. गुणेषु यत्नसाध्येषु यत्ने चात्मनि संस्थिते ।
अन्योऽपि गुणिनां धुर्य इति जीवन् सहेत कः ॥५७॥

१२१. आक्षीरधारैकभुजामागर्भैकनिवासिनाम् ।
नमोऽर्थेभ्यः पृथक्त्वं ये भ्रातृणामपि कुर्वते ॥५८॥

१२२. अद्यापि देहे मम मांसमस्ति शिरामुखैः स्यन्दत एव रक्तम् ।
तृप्तिं न पश्यामि तवैव तावत्त्वं भक्षणात् किं विरतो गरुत्मन्! ॥५९॥

१२३. क्षुद्राः ! संत्रासमेतं विजहत हरयो भिन्नशक्रेभकुम्भाः
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे ! तिष्ठ पात्रं त्वमपि न हि रुषां नन्वहं मेघनादः
किञ्चित्संरम्भलीलानियमितजलधिं राममन्वेषयामि ॥६०॥

[हनुमन्नाटकम् १२.२]

**बीभत्सः**

१२४. अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनह्य शिरसा हृत्पुण्डरीकस्रजः ।
एताः शोणितपङ्ककुङ्कुमजुषः संभूय कान्तैः पिब-
न्त्यस्थिस्नायुसुरां कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥६१॥

[मालतीमाधव ५.१८]

१२५. अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायः प्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्
व्यालोलस्तनबन्धबन्धुरवपुर्बद्धोद्धतं धावति ॥६२॥ [महावीरचरित १.३५]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१२६. यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यः सत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्याऽन्तकोऽहम् ॥६३॥
[वेणीसंहार ३.३२]

१२७. मन्त्रान्मृत्युजितो जपद्भिरसकृद् ध्यायद्भिरिष्टान् सुरान्
शुष्यत्तालुभिराकुलाकुलपदैर्निर्वाग्भिरुत्कम्पिभिः ।
अध्वन्यैरिह जीवितेशमहिषव्याधूम्रधूमाविला
लङ्घ्यन्ते करिमांसघस्मरकणत्कौलेयकाः पल्लयः ॥६४॥

१२८. अथेदं रक्षोभिः कनकहरिशा( ण )च्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्यं करुणकरुणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलयति च ( दलति? ) वज्रस्य हृदयम् ॥६५॥
[उत्तररामचरित १.२८]

१२९. इतो वसति केशवः पुरमितस्तदीयद्विषा-
मितोऽपि शरणागताः शिखरिपत्रिणः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो ! विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥६६॥

स्त्रीवर्णकम् ।

१३०. अन्योन्योपमितं युगं निरुपमं वा युग्ममङ्गेषु ते
सोऽयं सिक्थकमात्रमास्यमधुनस्तन्वङ्गि ! चन्द्रस्तव ।
त्वद्वाचां स्वरमातृकां मधुकरः पुंस्कोकिलो घोषय-
त्यभ्यासस्य किमस्त्यगोचरमिति प्रत्याशया मोहितः ॥६७॥

१३१. सरस्यामेतस्यामुदरवलिवीचीविलुलितं
यथा लावण्याम्भोजघनपुलिनोल्लङ्घनपरम् ।
यथा दृश्यश्चायं चलनयनमीनव्यतिकर-
स्तथा मन्ये मग्नः प्रकटकुचकुम्भः स्मरगजः ॥६८॥

१३२. मृद्वङ्गि ! कठिनौ तन्वि ! पीनौ सुमुखि ! दुर्मुखौ ।
अत एव बहिर्भूतौ हृदयात्ते पयोधरौ ॥६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१३३. समस्तं विज्ञाय स्मरनरपते राज्यमसमं
वरं चक्षुःकल्ले कथयितुमगात्सत्वरमिव ।
प्रयाणं बाल्यस्य प्रतिपदमभूद्विग्रहभरः
परिस्पन्दो वाचामथ च कुचयोः सन्धिरभवत् ॥७०॥

गद्यविद्याधरत्रिलोचनस्य ।

१३४. द्वित्रैः पाणिसरोरुहं त्रिचतुरैर्धम्मिल्लमाल्यस्रजः
कण्ठान्मौक्तिकवल्लरीं तदनु च क्षिप्ता पदैः पञ्चषैः ।
हित्वा भारपरम्परामतिजवात्त्वां देव ! संवीक्षितुं
तन्वङ्गी निरुपायमध्वनि मुहुः श्रोणीभरं निन्दति ॥७१॥

१३५. सा वार्यते परिजनैरजिराधिरूढभूतप्रसूनकलिकामपनीय यावत् ।
अत्रान्तरे स्थविरकीरनिवारितानामभ्युद्गतः कलकलो गृहकोकिलानाम्
॥७२॥

१३६. ग्रीष्मे गाढाभितापाकुलपथिकचये चन्दनस्थासकाङ्का
उद्वृत्तैस्तालवृन्तैः सततपरिहृतप्राज्यघर्माम्भसश्च ।
कर्पूरस्फारफालीकलितकिसलयप्रस्तरोद्दामलीला
नाधन्याः क्रीडयन्ते वरयुवतिजनैर्यत्र धारागृहेषु ॥७३॥

१३७. भस्त्रागोलप्रतिसमपयोवाहवान्तैर्मरुद्भिः
पान्थस्त्रीणां धमति हृदयाधारमग्निं त्रियामा ।
भास्वत्कार्तस्वरकणरुचो भान्ति खद्योतवृन्द-
व्याजादन्धे तमसि च बहिर्वृत्तयो विस्फुलिङ्गाः ॥७४॥

१३८. यथा व्योम्नो रन्ध्रं चलजलदधूमः स्थगयति
स्फुलिङ्गायन्तेऽमी झगिति च यथा कीटमणयः ।
यथा विद्युज्ज्वालोल्लसनपरिपिङ्गाश्च ककुभ-
स्तथा मन्ये लग्नः पथिकतरुषण्डे स्मरदवः ॥७५॥

१३९. उत्फुल्लन्मुचुकुन्द-कुन्द-लवलीपुष्पाञ्चितोद्यानभू-
र्हेमन्ते दयिताकुलाध्वगजनः सोऽयं समभ्यागतः ।
यस्मिन्सौधतलेषु धूपकलितेषूद्दामतूलीतले
धन्याः कुङ्कुमयोगरम्यतरुणीश्लेषोष्मणा शेरते ॥७६॥

१४०. वेपन्ते कपयो भृशं कृशजडं गोजाविकं ग्लायतिं
श्वाचुल्ली कुहरोदरं क्षणमधिक्षिप्तोऽपि नैवोज्झति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीतार्तिव्यसनातुरः पुनरयं दीनो जनः कूर्मवत्
स्वान्यङ्गानि शरीर एव हि निजे निह्नोतुमाकांक्षति ।।७७।।

१४१. दृष्ट्वा रूपविलोकनानिमिषदृक् पान्थः प्रपापालिकां
निस्तोयां न गलन्तिकां कलयति प्रोद्भूतभावान्तराम् ।
अम्भोऽपास्य कृतापराञ्जलिविधि( धे? )रस्यापि संवर्धते
तल्लावण्यसुधौघपूर्णनयनस्था ग्रैष्मिकी काऽपि तृट् ।।७८।।

१४२. रहःसंकेतस्थो घनतरतमः पुञ्जपिहिते
वृथोन्मेषं चक्षुर्मुहुरुपदधानः पथि पथि ।
षडत्कारादल्पादपि निभृतसम्प्राप्तरमणी-
भ्रमभ्राम्यद्बाहुर्दमदमिकयोत्ताम्यति युवा ।।७९।।

१४३. अम्भोजाक्ष्याः पुरवनलताधाम्नि संकेतभाज-
श्चेतोनाथे चिरयति भृशं मोहनिद्रां गतायाः ।
स्वच्छं नाभीह्रदवलयितं काञ्चिरत्नांशुजालं
तोयभ्रान्त्या पिबति हरिणी विस्मयं च प्रयाति ।।८०।।

१४४. वयं बाल्ये डिम्भास्तरुणिमनि यूनः परिणता-
वपीप्सामो वृद्धान् परिणयविधेस्तु स्थितिरियम् ।
त्वयाऽऽरब्धं जन्म क्षपयितुमपूर्वेण विधिना
मनो गोत्रे पुत्रि ! क्वचिदपि सतीलाञ्छनमभूत् ।।८१।।

चन्द्रोदयः

१४५. द्वावप्येतावभिनवजपापुष्पभासां निवासो
तिष्ठत्यन्ते द्वयमपि वियन्मण्डलस्योपसन्ध्यम् ।
अस्तं को यात्युदयति च कः को रविः कः शशाङ्कः
का च प्राची तदिह न वयं का प्रतीचीति विद्मः ।।८२।।

१४६. लक्ष्मीक्रीडातडागं रतिधवलगृहं दर्पणो दिग्वधूनां
पुष्पं श्यामालतायास्त्रिभुवनजयिनो मन्मथस्यातपत्रम् ।
पिण्डीभूतं हरस्य स्मितममरसरित्पुण्डरीकं मृगाङ्को
ज्योत्स्नापीयूषवापी जयति सितवृषस्तारका गोकुलस्य ।।८३।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरहिण:

१४७. पश्यामि तामित इतश्च पुरश्च पश्चा-
दन्तर्बहिः परित एव विवर्तमानाम् ।
उद्बुद्धमुग्धकनकाब्जनिभं वहन्ती
व्यासङ्गतिर्यगपवर्तितदृष्टि वक्त्रम् ॥८४ [मालतीमाधव १.४०]

१४८. अलमतिचपलत्वात्स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेन प्रियायाः ।
इति यदि शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥८५॥

१४९. चित्रं चित्रसुवर्णकारकमुखोद्गीर्णैर्मरुद्भिर्मुहु-
र्मच्चेतःशकटीमनोजशिखिनि प्रोच्चैः समुद्दीपिते ।
यत्क्षिप्तापि न दह्यते मृदुरपि प्रेयस्यहो वेधसा
सृष्टा तत् खलु सार्धषोडशकषोत्तीर्णैः सुवर्णैरियम् ॥८६॥

१५०. अमी हेलोन्मेषव्यसनिषु पलाशेषु परितः
पिबन्ति स्वच्छन्दं मधु मधुलिहो माद्यति जनः ।
अयं च प्रत्यग्रं दशति सहकारं परभृतो
मदीयं मर्मान्तं दलयति क एष व्यतिकरः ॥८७॥

अथ विरहिण्यः

१५१. प्रीत्या स्वस्तिपदं विलोकितवती स्थानं श्रुतं तुष्टया
यच्चायातमनुक्रमेण पुरतस्तत्तावकं नायकम् ।
तन्व्या सम्मदनिर्भरेण मनसा तद्वाचयन्त्या मुहुः
न प्राप्तो घनबाष्पपूरितदृशालेखेऽपि कण्ठग्रहः ॥८८॥

१५२. देवेन प्रथमं जितोऽसि शशभृल्लेखाभृताऽनन्तरं
बुद्धेनोद्धतबुद्धिना स्मर ! ततः पान्थेन कान्तेन मे ।
त्यक्त्वा तान् बत हंसि ! मामतिकृशां बालामनाथां स्त्रियं
धिक् त्वां धिक् तव पौरुषं धिगुदयं धिक्कार्मुकं धिग्छरान् ॥८९॥

सखीसमालोचनम्

१५३. आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नासाग्रे नयनं यदेतदपरं यच्चैकनिष्ठं मनः ।
मौनं चेदमिदं च शून्यमखिलं यद्विश्वमाभाति ते
तद् ब्रूयाः सखि ! योगिनी किमसि भोः ! किं वा वियोगिन्यसि ? ॥९०॥

१५४. निशा वा वृष्टिर्वा तिमिरमथवा गर्जिरथवा
तडिद्वा पङ्क्ते वाऽभिनवसरितां श्रेणिरथवा ।
यथेष्टं चेष्टन्ते यदि न दयितः प्रेमविमुखः
प्रदीपः स्नेहाढ्यो न खलु शलभौघैर्विरमति ॥९१॥

१५५. असावहं लोहमयी स यस्या जातः पति प्रस्तर एव कान्तः ।
आकर्षकद्रावकचुम्बकानां नैकोऽप्यसौ भ्रामक इत्यवैमि ॥९२॥

दूतीवचनानि

१५६. विलिम्पत्येतस्मिन्मलयजरसेनेव महसा
दिशां चक्रं चन्द्रे सुकृतमय ! तस्या मृगदृशः ।
दृशोर्बाष्पः पाणौ वदनमसवः कण्ठकुहरे
हृदि त्वं होः पृष्ठे वचसि च गुणा एव भवतः ॥९३॥

१५७. सखीं भिक्षां याचे तव नतशिरास्त्वामियमहं
न चेदस्ति प्रेमा तदपि कुरु कारुण्यकणिकाम् ।
अवस्था सा तस्याः सुकृतमय ! यस्यां किमपरं
प्रमोहो विश्रामस्त्वमथ शरणं वा प्रतिकृतिः ॥९४॥

१५८. ................ ॥९५॥

१५९. अंशा( सा )कृष्टदुकूलया सरभसं गूढौ भुजाभ्यां स्तना-
वाकृष्टे जघनांशुके कृतमधःसंसक्तमूरुद्वयम् ।
नाभीमूलनिबद्धचक्षुषि मयि व्रीडानताङ्ग्या तया
दीपः पूत्कृतिवातकम्पितशिखः कर्णोत्पलेनाऽऽहतः ॥९६॥

१६०. प्रेमासङ्गि च भङ्गि च प्रतिवचोऽप्युक्तं च गुप्तं तथा
यत्नाद्याचितमाननप्रतिसमाधाने च हाने च धीः ।
इत्यन्यो मधुरः स कोऽपि शिशुना( ता? )तारुण्ययोरन्तरे
वर्तिष्णोर्मृगचक्षुषो विजयते वैदग्ध्यमुग्धो रसः ॥९७॥

---

१५८. लेखनस्य लुप्तत्वादवाच्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६१. यदेतद्धन्यानामुरसि तरुणीसङ्गमवशात्
किमप्याविर्भूतं पुलकमिदमाहुः किल जनाः ।
मतिस्त्वेषाऽस्माकं नवकुचतटीचुम्बकशिला-
निवेशादाकृष्टः स्मरशरशलाकोत्कर इति ॥९८॥

१६२. .................. ॥९९॥

१६३. विततपृथुवरत्रातुल्यरूपैर्मयूखैः
कलश इव गरीयान् दिग्भिराकृष्यमाणः ।
कृतचटुलविहङ्गालापकोलाहलाभि-
र्जलनिधिजलमध्यादेष उत्तार्यतेऽर्क : ॥१००॥

अथ शान्तः

१६४. न ग्लानिः सुरतैः प्रियाविरहजैः क्लेशो न दोषाक्षयै
रत्यन्ते विरतिर्न वाऽऽप कलहः प्रेम्णाऽपि नेर्ष्या क्वचित् ।
इत्थं द्वन्द्वविवर्जितारतिमतः स्वात्मैकरामप्रियाः
यस्येहास्ति महामतेर्न स शचीभर्तुः पदं वाञ्छति ॥१०१॥

१६५. हारस्मेरनितम्बिनीकुचतटक्रीडारसोत्कण्ठितं
यत्कन्दर्पकथाकुतूहलभरभ्रान्तं ममाऽऽसीत् पुरा ।
तच्चेतः सुरवाहिनीवलयिनि प्रालेयशैलोपल-
श्रेणीसुस्थितमीहते भव भवत्सेवाविलासोत्सवान् ॥१०२॥

१६६. आत्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभांज्यपि धनान्येकान्ततो निःस्पृहाः ।
न प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढप्रत्ययौ
वाञ्छामात्रपरिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥१०३॥

१६७. अजानन् दाहात्म्यं पतति शलभस्तत्र दहने
न मीनोऽयं ज्ञात्वा बडिशगतमश्नाति पिशितम् ।
विजानन्तोऽप्येते वयमिह विपज्जालजटिला-
न्न मुञ्चामः कामानहह ! गहनो मोहमहिमा ॥१०४॥

१६८. आयुर्नीरतरङ्गभङ्गुरमिदं ज्ञात्वा सुखेनाऽऽस्यते
लक्ष्मीः स्वप्नविनश्वरेति सततं भोगेषु बद्धा रतिः ।

१६२. लेखनस्य लुप्तत्वादवाच्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अम्भ्रस्तम्बविडम्बि यौवनमिति प्रेम्णाऽवगूढाः स्त्रियो
यैरेवात्र विमुच्यते भवरसात्तैरैव बद्धो जनः ॥१०५॥

१६९. वदति हसति भुङ्क्ते याति गृह्णाति शेते-
वहति पठति दत्ते याचते माद्यतीष्टे ।
प्रणमति नरिनर्ति प्राणिति क्रोशतीत्थं -
बत विषयपिशाचग्रस्तदेहो मनुष्यः ॥१०६॥

१७०. उच्छ्वासावधयः प्राणाः स चोच्छ्वासः समीरणः ।
समीरणाच्चलं नान्यत्क्षणमप्यायुरद्भुतम् ॥१०७॥

१७१. श्लाघ्यं यत्तत्कृपणमनसां सप्तलोकाधिपत्यं
या मृग्यन्ते तरलमतिभिः सिद्धयश्चाणिमाद्याः ।
एतत्सर्वं मदनदहन ! त्वत्पदप्राप्तिभाजां
तत्त्वज्ञानामृतरसजुषां योगिनामन्तरायः ॥१०८॥

१७२. यल्लीलाकमलाहतौ प्रमुदितं यन्मन्मथस्यास्पदं
यत्कान्तप्रणयापराधकलहे पर्याप्तकौतूहलम् ।
यत्प्रेमार्द्रवधूविलासतुलितभ्रूलास्यबद्धस्पृहं
तच्चेतः स्मरवैरिभग्नसदनप्रान्तस्थितिं वाञ्छति ॥१०९॥

इति शान्तः ॥

अथ जातिः

१७३. पक्षावुत्क्षिप्य किञ्चिन्मसृणमुकुलितानम्रमूर्द्धाग्रपिच्छः
कूजत्कण्ठार्द्धरुद्धस्वरमथ पुलकोड्डामरक्रोडदेशः ।
पश्चादग्रे च वल्गन्मनसिजदहनोद्रेकपर्याकुलाङ्ग-
स्तिर्यग् तिर्यग् प्रसर्पत्यनुनयचटुलो नीलकण्ठः स्वकान्ताम् ॥११०॥

१७४. आरोहत्यवरोहति क्षणमनुक्षामक्वणत्कण्ठिकां
चूडाचञ्चलचञ्चुकोटिघटनान्यञ्चन्मुखीं पक्षिणीम् ।
गुञ्जन्मञ्जु रिरंसुरेव चटको निष्यन्दपादद्वय-
न्यासाविष्कृतमन्मथः श्लथदलत्पक्षावलीसंहतिः ॥१११॥

१७५. विलासमसृणोल्लसन्मुसललोलदोःकन्दली
परस्परपरिस्खलद्वलयनिस्वनोद्दन्तुराः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हरन्ति कलहुङ्कृतिप्रसभकम्पितोरःस्तन-
त्रुटद्गमकसंकुलाः कलमकण्डनीगीतयः ॥११२॥

१७६. चञ्चच्चञ्चलचञ्चुवञ्चनचलच्चूडाग्रमुग्रं पत-
च्चक्राकारकरालकेसरसटास्फारस्फुरत्कन्धरम् ।
वारंवारमुदंहिलङ्घनघनप्रेङ्खन्नखच्छिन्नयोः
कामं कुक्कुटयोर्युगं द्रुतपदक्रूरक्रमं युध्यति ॥११३॥

१७७. अङ्गुष्ठाग्रिमवक्रिताङ्गुलिरधःपादार्धनीरुद्धभूः
पार्श्वोद्वेगकृतो निहत्य कफणिद्वन्द्वेन दंशान्मुहुः ।
न्यग्जानुद्वययन्त्रयन्त्रितघटीवक्त्रान्तरालस्खलद्-
धाराध्वानमनोरमं पथि पयो गां दोग्धि गोपालकः ॥११४॥

१७८. उत्प्लुत्य स्थितिमान् क्षणं स चकितः कोपादुदञ्चद्गलो
चूत्कुर्वंश्च मुहुर्मुहुर्वलयितं लाङ्गूलमान्दोलयन् ।
व्यादायास्यमुदग्रलोलरसनं दन्तैः कटत्कारिभि-
र्गृह्णात्यस्तचलेक्षणो भ्रमिवशात् कौलेयको दंशिकाः ॥११५॥

१७९. शैलैर्बन्धयति स्म वानरहृतैर्वाल्मीकिरम्भोनिधिं
व्यासः पार्थशरैस्तथापि न तयोरत्युक्तिरुद्भाव्यते ।
वस्तु प्रस्तुतमेव किञ्चन वयं ब्रूमस्तथाप्युच्चकै-
र्लोकोऽयं हसति प्रसारितकरस्तुभ्यं प्रतिष्ठे ! नमः ॥११६॥

१८०. कोऽपि क्वापि कुतोऽपि कस्यचिदहो चेतस्यकस्माज्जनः
केनापि प्रविशत्युदुम्बरफलप्राणिक्रमेण क्षणात् ।
येनास्मिन्नपि पाटिते विघटिते विस्फोटिते त्रोटिते
निष्पिष्टे परिगालिते विगलिते निर्याति वा नैव वा ॥११७॥

१८१. रसनाग्रेषु नीचानां हृदयेषु मनीषिणाम् ।
धीराणां वसति क्रोधः क्रियासु कृतविस्तरः ॥११८॥

१८२. तावद्बिभ्यति शत्रवः शुचियशस्तावद्दिशो गाहते ।
तावज्ज्ञातिजनो न याति विकृतिं यावच्च कीर्तिः स्थिरा ।
तावत्संस्तुतचापलापि कमला धत्ते कुलस्त्रीव्रतं
यावद्वीरजनोचितेन पुरुषो मानेन न त्यज्यते ॥११९॥

१८३. शुश्रूषस्व गुरून् कुरु प्रियसखीकृत्यं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥१२०॥
[अभिज्ञानशाकुन्तल ४.१८]

१८४. सत्यं हारि नितम्बिनीस्तनतटं सत्यं मनोज्ञाः श्रियो
विद्यातोपचितिर्भवत्यवितथं स्वर्गाय सत्यं तपः ।
किन्त्वेतेन विनाशिनाऽत्र वपुषा कष्टं न जानीमहे
धास्यामः कियतामधो निपततां धारातिलानां मुखम् ॥१२१॥

१८५. अङ्गनानामिवाङ्गानि गोप्यन्ते स्वगुणा यदा ।
स्पृहणीयास्तदा ते स्युस्तदा तेऽत्यन्तमुज्ज्वलाः ॥१२२॥

१८६. द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधेरभिमतमभिमुखीभूतः ॥१२३॥
[रत्नावली १.६]

१८७. प्राप्याऽसुखानि च सुखानि च दैवयोगात्
मा रोषमाचर विधेह्यधिकं च तोषम् ।
एतस्य कालपरिपाकवशेन पूर्वं
किं न श्रुता भगवतोऽपि दशावताराः ॥१२४॥

१८८. काले कलौ राजनि चार्थलुब्धे धनेन किं रक्षथ जीवितानि ।
नन्वेष लाभो यदि शौने( नि? )केन मुच्येत मेषो हृतसर्वलोमा ॥१२५॥

१८९. संसारेऽस्मिन् ध्रुवमसुलभं मानुषं जन्म लब्ध्वा
युष्मानेको भजति सुकृती कश्चिदन्यं च देवम् ।
आरूढोऽपि स्मरहरगिरिं रोहणं भाग्ययोगाद्-
एको रत्नं कलयति पुनः काचमन्यश्च फल्गुम् ॥१२६॥

१९०. नग्नस्तिष्ठति धूलिधूसरतनुर्गोपृष्ठमारोहति
व्यालैः क्रीडति नृत्यति क्षरदसृक् चर्मोद्वहन् दन्तिनः ।
प्रेतावासरुचिः कपालभृतभुग् नाराऽस्थिभूषोल्बणः
प्रायो नोपदिशन्ति यस्य गुरवस्तस्येदमाचेष्टितम् ॥१२७॥

१९१. हंहो माधव ! किं वयस्य ! सुमते ! किञ्चिद्रहस्यं ब्रुवे
ओमित्यन्तमृजुः प्रकीर्णविभवो दक्षात्मजावल्लभः ।
तद्गत्वा विपिने प्रतार्य कुसुमैरर्कस्य बिल्वस्य वा
गृह्णीमः सुरमौलिलालितपदां त्रैलोक्यराज्यश्रियम् ॥१२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१९२. येनैवास्य निवेदितं किमपि वा येनाथवा संस्तुतो
यो वा कोऽपि पुरोऽस्य गायति हसत्यग्रे स्थितः कोऽपि वा ।
तेभ्यो येन समर्पितास्त्रिभुवनोदग्राः समस्ताः श्रियो
रूक्षो नग्नवपुः स एष न कथं भिक्षां भवो भ्राम्यति ॥१२९॥

१९३. कोऽयं नाथ ! स्फुरति भवतो भावनातत्पराणां
वारंवारं वपुषि पुलकोद्भेदकारी प्रभावः ।
यत्क्षीर्णानि त्वयि पशुपते ! देहिनां कर्मपाश-
ग्रन्थिच्छेदे कुवलयदलान्येव खड्गीभवन्ति ॥१३०॥

१९४. भास्वद्भूरिभुजङ्गभीषणवती ज्योतिर्वहन्ती पुरं
मुद्रामण्डलशालिनी च यदियं संलक्ष्यते ते तनुः ।
एतस्मात्परमार्थसंभृतनिधेस्तात ! त्वमेको मत-
श्चित्रं किन्तु यदव्ययेन भवता सर्वः कृतार्थीकृतः ॥१३१॥

१९५. यैर्भूतेश ! भवन्मयं त्रिभुवनं भव्यात्मभिर्भावितं
तन्माहात्म्यविशेषवर्णनविधौ ब्रह्माऽप्यवागीश्वरः ।
ये चानेककुतर्ककर्कशधियस्त्वामाक्षिपन्तीश्वरं
श्रेयस्तेऽपि विभो ! भजन्ति किमपि त्वन्नामसंकीर्तनात् ॥१३२॥

१९६. महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा गुणानां नन्वियत्तया ॥१३३॥

१९७. ग्रीष्मे तुल्यगुडां सुसैन्धवयुतां मेघावनद्धाम्बरे
तुल्या शर्करया शरद्यभिनवे शुण्ठ्या तुषारागमे ।
पिप्पल्या शिशिरे वसन्तसमये क्षौद्रेण तां संयुतां
राजन् ! प्राप्य हरितकीमिव गदा नश्यन्तु ते शत्रवः ॥१३४॥

मुम्मणरचितसुभाषितावली समाप्ता ॥

—x—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्लोकानुक्रमणिका


अंसाकृष्टदुकूलया १५९
अकलितपरस्वरूप २९
अखर्वपर्वगर्तासु ४९
अङ्गनानामिवाङ्गा १८५
अङ्गुष्ठाग्रिमवक्रि १७७
अच्छिन्नमेखल ४
अजानन् दाहात्म्यं १६७
अथेदं रक्षोभिः १२८
अद्यापि देहि मम १२२
अधोमुखमसाधू २४
अनुद्घुष्टः शब्दैः ४२
अनुहरतः खलसुजना २३
अन्त्रप्रोतकपाल १२५
अन्त्रैः कल्पितमण्डल १२४
अन्योन्योपमितं १३०
अपेक्षन्ते न च २१
अपारे काव्यसंसारे ३६
अभ्युद्धृता वसु ११७
अमी हेलोन्मेष १५०
अमुं कालक्षेपं ९६
अम्भोजाक्ष्याः पुरतः १४३
अलमतिचपल १४८
अवतु वः सवितु १५
अविरलगवल ९३
असंख्यैरपि नात्मी १९
असावहं लोहमयी १५५
आः कष्टं किल ६२
आक्षीरधारैकभुजा १२१
आत्ते सीमन्तचिह्ने ११४
आत्मज्ञानविवेक १६६
आत्मनाशाय नो २६
आदाय मांसम १०५
आयुर्नीरतरङ्ग १६८
आरोहत्यवरोह १७४


---

**१५९.** शा.प. ३६९४ – स.क. ११२१–सु.को. ३७० – सू.मु. ७७/९, **२९.** सु.को.१२८३, **४९.** शा. प. १०७५ – सू.मु. १०३/९४ सू.र.को. ५९९, **१७७.** स.क. २००१ – सु.को. ११५७ – सू.मु. ९६/१४, **४.** स.क. १३७, **१६७.** वैराग्य. २१ – शा.प. ४१५६ – सू.मु. १३१/७३. **४२.** स.क. २१६० – सु.को. १७०५ – सू.मु. ४/३६, **२३.** शा.प. २३९ – सू.मु. ६/११ सु.को. १२१८, **१२५.** सू.मु. ९४/३, **१२४.** शा.प. ४०७६ – सु.को. १५३२ – सू.मु. ९४/४, **१३०.** सु.को. ४५३. **२१.** सु.को. १२३०, **११७.** स.क. १६३६ – सु.को. १७५ – सू.मु. ९७/५, **१५०.** सू.मु. ५९/३६, **९६.** शा.प. ७८४ – स.क. १९४० – सु.को. १०२९ – सू.मु. १३/१३, **१४३.** शा.प. ३६१५– सू.मु. ७१/१३, **१४८.** शा.प. ५६६ – सु. को. ४७७, **१५.** सू.मु. २/५९, **१५५.** सु.को. ७२४, **१२१.** सू.र.को. ५४२२, **११४.** शा.प. १२७६ – सू.मु. ९७/७०, **१६६.** सु.को.१६०४ – सू.मु. १२६/१७, **२६.** सू.मु. ११०/५, **१०५.** शा.प. ४०१५ – स.को. १९१५ – सु.व. ६६० – सू.मु. ९०/१, **१६८.** सू.मु. १३१/४५, **१७४.** १३१.५० सू. मु. १२६/८.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| आशावलम्बो | ५० |
| आहारे विरति | १५३ |
| इतो वसति केशव | १२९ |
| उच्छ्वासावधय | १७० |
| उत्तंसकौतुकरसे | ७८ |
| उत्प्लुत्य स्थिति | १७८ |
| उत्फुल्लन्मुचुकुन्द | १३९ |
| उदारचरितात् त्यागी | ५७ |
| एकं योगनिमीलनात् | ३ |
| एतत्किं शिरसि | ६ |
| एतस्मिन्पदके | ८७ |
| ऋजुरेष पक्षवान् | २२ |
| करस्पर्शारम्भा | ५ |
| कवयः कालिदासा | ३३ |
| काले कलौ राजनि | १८८ |
| कान्तास्मद्वैव | ११८ |
| किंछत्रं किं नु रत्नं | ८ |
| कुतस्त्वमणुकः | १० |
| कुसुमान्यञ्जलि | १८ |
| केचिद्वस्तुनि नो | ३८ |
| केनासीनः सुखम | ८८ |
| को न हर्षवशं | १४ |
| कोऽपि क्वापि | १८० |
| कोऽयं नाथ | १९३ |
| को हि तुलामधि | ६५ |
| क्षिप्तो हस्ताव | १ |
| क्षुद्राः संत्रासमेते | १२३ |
| गतवति चिरं यूथा | १०३ |
| गाढतरबद्धमुष्टे | ५६ |
| गोनासाय नियो | ७ |
| गुणेषु यत्नसाध्येषु | १२० |
| ग्रीष्मे गाढाभितापा | १३६ |
| ग्रीष्मे तुल्यगुडां | ११७ |
| चञ्चच्चञ्चल | १७६ |
| चित्रं चित्रं सुवर्ण | १४९ |
| जयत्यन्यः स | ४१ |
| तावत्कविविहङ्गा | ३५ |
| तावद्भिभ्यति | १८२ |
| तेजोऽन्यदेव नक्षत्र | १२ |
| ते वः पान्तु विलोल | १६ |
| त्वं जातोऽसि चतु | ७३ |
| ददतो युध्यमान | ४५ |
| दारिद्याय नमस्तुभ्यं | ५५ |
| दिग्मातङ्गघटा | ४८ |
| दृष्ट्वा रूपविलो | १४१ |
| दोषाकरत्वाद्यदि | ७४ |


**१५३.** शा.प. ३४२३ – सु.को. ७०३ – सु.व. ३४८५ – सू.मु. ३९/३, **१२९.** नीति. ७६, सु.को. १२०४ – सु.व. ८८६, **१७०.** सू.मु. १३१/६१, **७८.** सू. मु. ३३/१६. ३. स.क. ७०, सू.मु. ८/२४, **५.** सू.मु.१/९, **३३.** सु.को. १७१३ – सू.र. को. ३७, ८. स.क. २१६ – सू.मु. २/८५, **१०.** स.क. २१३ – सु.को. ११४, **८८.** स.क. १७२५ – सु.को. १०२३–सू. मु. २८/११, **१८०.** सू.मु. १२७/१० – १२०/१०, **६५.** सू.मु. ३६/२१, **१.** स.क. ७६–सु.को. ४९, **१२३.** सु.व. २२८३, **७.** स.क. १११ – सु.को. १०२ – सू.मु. २/३६, **१२०.** सू.मु. १२१/५ **१७६.** स.क. २०३४ – सु.को. ११७१, **४८.** स.क. २२१–सू.मु. १/४०, **१५२.** स.क. ९८७–सु.को. ७०१, **७४.** सू.मु. ३०/६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| देवेन प्रथमं जितो | १५२ | बहिः सर्वाकार | ११९ |
| द्वावप्येतावभि | १४५ | ब्रह्माण्डच्छत्र | १२ |
| द्वित्रैः पाणिसरोरुहं | १३४ | ब्रह्माण्डोदरगो | ४७ |
| द्वीपादन्यस्मादपि | १८६ | भस्त्रागोलप्रति | १३७ |
| नद्यो नीररता | ११० | भास्वद्भूरिभु | १९४ |
| नग्नस्तिष्ठति | ११० | भुङ्क्ते तस्यैव | ४६ |
| न ग्लानिः सुरतै | १६४ | भ्रातश्चन्दन किं | ७५ |
| नदीतीरे शाखिन्नु | ७४ | भ्राम्यन्मन्दर | ११ |
| न शम्भोरम्भोजैः | १०६ | मदोष्मासंता | ८१ |
| न स राष्ट्रो न | ४० | मनः सक्तुकणो | ५१ |
| नातिनिर्मत्सरा | ६० | मन्त्रान्मृत्युजि | १२७ |
| नालस्यप्रसरो | ८३ | मन्था मन्दरभूधर | १४ |
| निधानीभूतमात्सर्य | २८ | महिमानं यदुत्की | ११६ |
| निरानन्दः कौन्दे | ६७ | महिम्ना नागेशं | ७१ |
| निशा वा वृष्टिर्वा | १५४ | माधुर्यादतिशै | ६४ |
| न्यग्रोधे फलशालिनि | ७७ | मा रोदीश्चिरमे | ५४ |
| पक्षावुत्क्षिप्य | १७३ | मालिन्यं भुवना | १०७ |
| पक्षी सूक्ष्मतनु | १०८ | मुखे यद्वैरस्यं | ८० |
| परिच्छिन्नस्वादो | ४३ | मृगेभ्यो रक्ष्यते | १०१ |
| पन्थाः संहर दीर्घ | ११६ | मृद्वङ्गि कठिनौ | १३२ |
| पश्यामि तामित इतश्च | १४७ | यच्चन्दार्थविभू | ८६ |
| प्रसीद प्रारम्भा | ९९ | यत्तद्गर्जितमूर्जि | ९५ |
| प्राप्यासुखानि च | १८७ | यत्पादाः शिरसा | ९१ |
| प्रीत्या स्वस्तिपदं | १५१ | यत्पूर्वमीषदप | ७९ |
| प्रेमासङ्गि च भङ्गि | १६० | यत्सौधशृङ्गार | ११२ |


८३. सू.मु. ११०/६६. ६७. स.क. १२५३ – सू.मु. १९/८, ७७. स.क. १९२६ – सु.को. १०६२ १६०. सु.को. ३४४ – सू. मु. ५१/९, ११९. सू.मु. ११०/६०, १२. सू.मु. २/८६, ७५. सू.मु. ३३/२६, ८१. सु.को. १०४३, ५१. सू.मु. १२६/४, १२७. सू.मु. ९३. ७, ६४. सु.को. १०६४ – सू.मु. १२०/९, ५४. सु.को. १३१४, ९१. सू.मु. १०.४.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा व्योम्नो रन्ध्रं १३८
यदमी दशन्ति २०
यदेतद्धन्यानामुरसि १६१
यन्नेत्रैस्त्रिभिरीक्षते ३७
यल्लीलाकमला १७२
यस्यावन्ध्यरुष १००
यानि त्वत्प्रार्थना ९८
युष्मानेको भजति १८९
येनैवास्य निवेदितं १९२
येषां मनांसि करुणा ६१
यो यः शस्त्रं बिभर्ति १२६
रसनाग्रेषु नीचानां १८१
रहः संकेतस्थो १४२
रागिणि नलिने १७
लक्ष्मीक्रीडातडागं १४६
वदति हसति १६९
वमतु गिरिराघृष्टे ७०
वर्णोत्कर्षप्रचार ३२
व्रजत व्रजत प्राणा ६३
वयं बाल्ये डिम्भां १४४
वरं मौनेन नीयन्ते ३९
वामन फलमत्यु ६६
विततपृथुवरत्रा १६३
विद्यावानपि जन्म ५२
विलासमसृणो १७५
विलिम्पत्येत १५६
वेपन्ते कपयो भृशं १४०
नातीतः पान्थ ! पन्था ११५
शबरशिशिरीभूते १०४
शिरः संख्यस्पर्धि ५८
शीतज्योतिः सुर ८४
शीतांशुबिम्बबहल ११३
शुश्रूषस्व गुरुन् १८३
शैलैर्बन्धयति १७८
श्रोता येनैव योगी ४४
श्लाघ्यं तत्तत्कृपण १७१
संध्यायत्प्रणि २
संसारेऽस्मिन् १८९
सखीं भिक्षां याचे १५७
सत्यं हारि नित १८४
समर्पिताः कस्य २५
समस्तं विज्ञाय १३३
सरस्यामेतस्या १३१
सा वार्यते परि १३५
सुप्तशौर्यं हि १०२
सुवर्णकार श्रवणो ६९


---

**१३८.** सू.मु. ६१/३९, **१६१.** सु.को. ५६९, **३७.** स.क. २१२२ – सु.को. १२४९, **१७२.** स.क. २३०२, **१००.** सु.को. १०३४, **१४२.** सु.को. ८९०, **७०.** सू.मु. १०८/२, **१४४.** स.क. ५३६ – शा.प. ३७८१, ६६. सू.मु. ३६/५४, **५२.** स.क. २२२५ – सु.को. १४८२, **१७५.** शा.प. ८२ – स.क. १०६३ – सु.को. ११७८ – सू.मु. ६२/३२, १५६. स.क. ६२१ सु.को. ५३, सू.मु. ४४/७, **१८३.** सू.मु. ११८/१, **१७८.** स.क. २३७४ – सु.को. १७२६, **१५७.** शा.प. ३४८५ – सू.मु. ४४/२८, **२५.** सू.मु. ८/३२, **१३३.** सु.को. ३६२, **१३१.** सू.मु. ४९/२१, **६९.** सु.को. १०३३– सु.व. ९७५,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| सेऽयं द्यौस्तदिदं | ९ |
| स्तोकाऽपि वन्द्यते | ३१ |
| स्तोकाम्भः परिवर्ति | ८२ |
| स्थानाद् भ्रष्टः | ७६ |
| स्नेहेन भूतिदानेन | ३० |
| स्वस्त्यस्तु विद्रुमः | ८५ |
| हंहो माधव किं | १९१ |
| हन्त चिन्तामणि | ५३ |
| हा धिक् परव्यसन | १०९ |
| हारस्मेरनितम्बि | १६५ |
| हृदयं कौस्तुभो | १३ |
| हृष्यन्ति चारु | २७ |
| हे कूर्मराज परमं | ७२ |
| हे मेघ मानसहित | ९७ |
| हे हंस मीलित | १११ |


९. स.क. ३११ - सु.को. १३७, ८२. सू.मु. ३१/१०, ३०. सू.मु. ८/१७, ८५. सू.मु. २७/६, १९१. सू.मु. १३३/१४ १३. सू.मु. २.६१, २७. सू.मु. ६/२२.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# छन्दःसूची

| | | |
|---|---|---|
| अनुष्टुप् | १३, १८, १९, २१, २६, २८, ३०-३६, ३८-४१ ४४, ४५, ४६, ४९, ५१, ५३, ५५, ५७, ६०, ६३, ९२, ९८, १०१, १२०, १२१, १३२, १७०, १८१, १८५, १९६. | ३७ |
| आर्या | १७, २०, २२, २३, २९, ५६, ६५, ६६, ९३, १०२, १८६ | ११ |
| इन्द्रवज्रा | ११२, ९८ | २ |
| उपेन्द्रवज्रा | २५ | १ |
| उपजाति | ५०, ६९, १२२, १५५, १८८ | ५ |
| द्रुतविलम्बित | १५ | १ |
| पृथ्वी | १०, १२९, १७५ | ३ |
| मन्दाक्रान्ता | ७६, ८४, ८८, १३७, १४३, १४५, १७१, १८९, १९३ | ९ |
| मालिनी | १४८, १६३, १६९ | ३ |
| वसंततिलका | ४, २७, ६१, ७२, ७८, ७९, ८५, ९७, १०५, १०९, १११, ११३, ११७, १३५, १४७, १८७ | १६ |
| शार्दूलविक्रीडित | २, ३, ६, ७, ९, ११, १४, १६, २४, ३७, ४७, ४८, ५२, ५४, ६२, ६४, ७३, ७५, ७७, ८२, ८३, ८६, ८७, ९१, ९५, १००, १०८, ११०, ११६, १२४, १२५, १२७, १३०, १३४, १३९, १४०, १४१, १४९, १५१, १५२, १५३, १५९, १६०, १६४, १६५, १६६, १६८, १७२, १७४, १७६-१८०, १८२, १८३, १८४, १९०, १९१, १९२, १९४, १९५, १९७ | ६३ |
| शिखरिणी | ५, ४२, ४३, ५८, ६७, ७१, ७४, ८०, ८१, ९६, ९९, १०६, ११९, १२८, १३१, १३३, १३८, १४२, १४४, १५०, १५४, १५६, १५७, १६१, १६७ | २५ |
| स्रग्धरा | १, ८, १२, १०७, ११४, ११५, ११८, १२३, १२६, १३६, १४६, १७३ | १२ |
| हरिणी | ७०, १०३, १०४ | ३ |
| | | १९७ |
| अवाच्य | ५९, ६८, ८९, ९०, १५८, १६२ | ६ |
| | | १९१ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सूक्तसंग्रहः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सूक्तसंग्रहः

१. तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
चाऽन्यः क्षणेन भवतीत्यतिचित्रमेतत् ॥१॥

२. यत्सेवन्तो नरपतिमहो मानवा मानशौण्डाः
यत्सङ्ग्रामे गृह इव निजे निर्विशङ्का विशन्ति ।
यद्भाषन्ते परुषवचसां स्वामिनां दीनमग्रे
हेतुस्तस्मिन् तरलनयना कामिनी काममेका ॥२॥

३. किमिह कपालकमण्डलुवल्कलसितरक्तपटजटापटा(ट?)लैः ।
व्रतमिदमुज्ज्वलमनसां पुंसां प्रतिपत्तिनिर्वहणम् ॥३॥

४. यद्गायन्ति च वादयन्ति च नृणां नृत्यन्ति चाग्रे सदा
नीचानामपि चित्रचाटुरचनास्तोत्राणि कुर्वन्ति वा ।
आरोहन्ति च रोहणाद्रिशिखरं क्रामन्ति चाम्भोनिधिं
मर्त्यास्तत्र निमित्तमुत्तमतमं मत्तेभकुम्भस्तनी ॥४॥

५. को वीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जनम् ।
यद्दंष्ट्रानखलाङ्गलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव वने द्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यर्थिनाम् ॥५॥

६. यज्जीव्यते क्षणमपि प्रथितं मनुष्यै-
र्विज्ञानविक्रमयशोभिरहीयमानैः ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥६॥

७. अत्युद्दामशिखैर्नखैर्विलिखनं संप(पा)दयन्ती तनोः
सीत्कारानपि मीलितेक्षणपुटानासूत्रयन्ती मुहुः ।
प्रागल्भ्यं करपीडनेन दधती संयोजितोरुक्लमा
पामा प्रेमवतीव किं न कुरुते दुःखानुविद्धं सुखम् ॥७॥

८. विदग्धोऽपि सुवृत्तोऽपि पात्रभूतोऽपि यः पुमान् ।
भवेन्न स गुणग्राह्यो घटवत्कर्णदुर्बलः ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९. अनुपहसितवृद्धधियामनभिलषितपरकलत्रशुचिमनसाम् ।
अनवज्ञातगुरूणां यौवनमुपयाति पुण्यवताम् ॥९॥

१०. स्थानप्रच्युतिरुन्नतिं लघयते नैवोत्तमानां क्वचित्
प्रायः श्लाघ्यतरा भवन्ति गुणिनः स्थानान्तरावासिषु ।
वृक्षाग्रे श्रियमातनोति न तथा प्रैयङ्गवी मञ्जरी
कर्णान्तालकवल्लरी विरचिता वक्त्रे तरुण्या यथा ॥१०॥

११. का श्रीः श्रोण्यामजस्रं स्रवदुदरदरीपूरि.सान्द्रद्रवायां
का शोभा भूरिमांसोद्भवगडुषु निपातोन्मुखेषु स्तनेषु ।
का वा लीला सुलीलाचलितजललवालोलकेष्वीक्षणेषु
स्त्रीणां किं वास्ति रम्यं वदत बुधजना! यत्र सक्तिं विदधाः (विधत्तः) ॥११॥

१२. आर्यजनवर्जितानां मूर्खाणां लोक-समयबाह्यानाम् ।
पार्श्वे न स्थातव्यं निरङ्कुशानामिव गजानाम् ॥१२॥

१३. सत्यार्जवहृदयानां किं वञ्चयितव्यमस्ति साधूनाम् ।
ये स्वहृदयानुमानाः परहृदयेष्वेन्ति विश्वाना( स )म् ( ? ) ॥१३॥

१४. भवति च न भवति च धनं कुलीनता दुर्लभा मनुष्यस्य ।
प्राप्य च कुलपुत्रत्वं चारित्राढ्येन भवितव्यम् ॥१४॥

१५. आलस्यं त्यक्तव्यं लौल्यं लोभः परापवादश्च ।
अस्थानेषु च कोपस्तथाऽभिमानश्च पुरुषेण ॥१५॥

१६. यो व्यसने न व्यथते न विस्मयं याति विभवमासाद्य ।
अभ्यर्थितः परार्थेष्वचलमतिः स्यात् स खलु धीरः ॥१६॥

१७. को देशयि(य)ति पन्थानमितश्चेतश्च धावताम् ।
स्वच्छन्दानां च पयसां प्राक्तनानां च कर्मणाम् ॥१७॥

१८. असारोऽपि हि संसारः सारवानिव लक्ष्यते ।
क्षीरोदजलकल्लोललोललोचनयाऽनया ॥१८॥

१९. आवर्जितेऽपि दातरि न नृपे न फलमस्ति भाग्यहीनस्य ।
विततायामपि योनौ वृषणौ बहिरेव लम्बेते ॥१९॥

२०. आदाय वरि( वारि ) परितः सरितां शतेभ्यः
किं नाम साधितमनेन महार्णवेन ।
क्षारीकृतं च वडवावदने हुतं च
पातालकुहि(क्षि)कुहरेषु निवेशितं च ॥२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२१. स्पृश्या ये न बताऽन्घ्रिणाऽपि शिरसा तेषां स्पृशामि क्रमौ
दृष्टं यन्मुखमप्यहो ! न हि मया पश्यामि तेषां पुतौ ।
याच्या न श्वपचैरपि क्वचन ये तानप्यहं प्रार्थये
हा धातस्त्वयि वामतामुपगते तत्किं न यत्प्राप्यते ? ॥२१॥

२२. अवलेपोऽङ्गगत्येव शुचेरप्यधिकारिणः ।
कराग्रं किं न लिप्येत शृणु श्रीषण्डघर्षिणः ॥२२॥

२३. ज्ञानदर्शनचारित्रपथ्यपाथेयसंभृताः ।
वपुःकुटीरवासे वा प्रवासे वा न दुःस्थिताः ॥२३॥

२४. प्रायेण यदपथ्यं तदेव चाऽऽतुरजनप्रियं भवति ।
विषयातुरस्य जगतौ य[था]नुकूलाः प्रिया विषयाः ॥२५॥

२५. अहो खलु(ल)भुजङ्गस्याऽपूर्वः कोऽपि वधक्रमः ।
अन्यस्य लगति श्रोण(त्रं)[प्रा]णैरन्यो वियुज्यते ॥२६॥

२६. जनन्या अपि नाख्येयं यत्कार्यं तत्सुहृज्जने ।
स्वजने कथनीयं स्यात् कोऽन्ये(न्यो?) विस्रम्भभाजनम् ॥२७॥

२७. विषयी विषयासक्तं सधनः सधनं गृही गृहिणमेव ।
सारम्भः सारम्भं न तुल्यदोषस्तु तारयति ॥२८॥

२८. विषयी विषयविमुक्तं सधनो निधनं गृही गृहविमुक्तम् ।
सारम्भोऽनार[म्भं] संश्रित्य भवार्णवं तरति ॥२९॥

२९. धर्मं चरतः साधोर्लोके निश्रापदानि चत्वारि ।
राजा गृहपतिरपरेः(रे) षट्काया निजशरीरं च ॥३०॥

३०. जिनपूजा गुरौ भक्तिस्तत्त्वे श्रद्धानमुत्तमम् ।
साधर्मिकानुरागश्च सारमेतज्जिनागमे ॥३१॥

३१. अनुक्ता अपि ते स्वयं गुणा यान्ति प्रकाशताम् ।
च्छाद्यमानापि सौरभ्यमुद्गमत्येव मालती ॥३२॥

३२. अन्नासत्तंमि पिए विच्छित्तिण्णे वयंसि का ईसा ।
खवणाण सिसिरकाले किं दुक्खं फल(लि)हि दाहे य ॥३३॥

---

३२. अन्यासक्ते प्रिये विच्छित्तिज्ञे वचसि का ईर्ष्या ।
क्षपणकानां शिशिरकाले किं दुःखं फलिष्यति दाहे च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३३. कीरन्ति जाइं जोव्वणमएण अवियारिऊण कज्जाइं ।
वयपरिणामे भरियाइं ताइं हियए खुडुक्कन्ति ॥३४॥

३४. इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणां स्वल्पं शास्त्रप्रयोजनम् ॥३५॥

३५. घृतादष्टगुणं तैलं तैलादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणा धृतिः ॥३६॥

३६. न गजैर्न[व]राहैः स्यात् न व्याघ्रैर्न च वाजिभिः ।
अजापुत्रं बलिं दद्यात् दैवं दुर्बलघातकः (कम्) ॥३७॥

३७. कालो( काले ) कलौ राजनि चार्थलुब्धे द्रव्येण किं रक्षत जीवितानि ।
नन्वेष लाभो यदि सौनिकेन मुच्येत मेषे( षो )गतकर्णरोमा ॥३८॥

३८. कपिलानां सहस्त्रं तु यो द्विजेभ्यः प्रयच्छति ।
एकस्य जीवितं दद्यात् कलां न( ना )र्घति षोडशीम् ॥३९॥

३९. आदानगर्वसंग्रहभयानुकम्पासु लज्जया दानम् ।
उपकारो धर्मार्थं दानं धर्मार्थं(य) न भयार्थम् ॥४०॥

४०. इन्द्रियाणि पशुं कृत्वा वेदीं कृत्वा तपोमयीम् ।
अहिंसामाहुतिं कृत्वा त्वात्मयज्ञं यजाम्यहम् ॥४१॥

४१. ये स्त्रीसंघोरुसंस्पृष्टाः कामगृध्नाःश्च ते द्विजाः ।
ये च रेतोभगस्पृष्टास्तेऽपि शूद्रा युधिष्ठिर ! ॥४२॥

४२. यदि जलेन विशुध्यन्ति वर्णाश्चेह चतुर्विधाः ।
कैवर्ता रजकाश्चैव देवलोकं व्रजन्ति ते ॥४३॥

४३. मनो विशुद्धं पुरुषस्य तीर्थं सर्वक्षमा इन्द्रियनिग्रहश्च ।
एतानि तीर्थानि शरीरजानि स्वर्गस्य मार्गं प्रतिदर्शयन्ति ॥४४॥

४४. अप्रकटीकृतशक्तिः शक्तोऽपि नरस्तिरस्कृतिं ल[भ]ते ।
निवसन्नन्तर्दारुणि लङ्घ्यो वह्निर्न तु ज्वलितः ॥४५॥

४५. सर्वस्य हि मनो लोके मैथुनाय प्रवर्तते ।
तच्च लाभात् भयाद्धैर्याद् विवेकाच्च निवर्तते ॥४६॥

---

३३. क्रियन्ते यानि यौवनमदेन अविचार्य कार्याणि ।
वयः परिणामे भृतानि तानि हृदये दुःखायन्ते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४६. अहिर्बिडालो जामाता या रण्डा च सुसूत्रिणी ।
उपकारं न मन्यन्ते भागिनेयश्च पञ्चमः ॥४७॥

४७. अभ्यस्यतां प्रवचनस्य वचांसि सम्यक्
नित्यं तथा विदधतां विशदं विवेकम् ।
एतानि यान्ति दिवसानि यथा तथैव
भाव्यं समुद्यमपरैरनिशं भवद्भिः ॥४८॥

४८. भरहेरवयविदेहे पन्नरस वि कम्मभूमिगा साहू ।
एगंमि प[इ]यंम्मि य सव्वे ते पूईया हुन्ति ॥४९॥

४९. चइऊण घरं चइऊण परियणं संपयंपि चइऊणं ।
देवस्स कुणइ [अ]विहिं पव्वज्जं आणभंगिल्लो ॥५०॥

५०. पढियं सुणियं गुणियं [सव्वं ?]आणाइ सुंदरं होइ ।
आणारहिओ धम्मो पलालपूलव्व पडिहाइ ॥५१॥

५१. हारवियं सम्मत्तं सामन्नं नासियं धुवं तेहिं ।
परचित्तरंजणत्थं आणाभंगो कओ जेहिं ॥५२॥

५२. न्यायं पालयतां कुलोन्नतिमतिप्रागल्भ्यमभ्यस्यतां
सन्तोषं दधतां दुरन्तविषयव्यामोहमुद्भिन्दताम् ।
शीलं शीलयतां कलेः प्रतिकलं मालिन्यमुच्छिन्दतां
नित्यं यान्ति यथा दिनानि भवतां कार्यस्तथाऽभ्युद्यमः ॥५३॥

---

४८. भरतैरावतविदेहे पञ्चदश अपि कर्मभूमिगाः साधवः ।
एकस्मिन् पूजिते सर्वे ते पूजिता भवन्ति ॥

४९. त्यक्त्वा गृहं त्यक्त्वा परिजनं संपदमपि त्यक्त्वा ।
देवस्य करोति अविधिं प्रव्रज्यां आज्ञाभङ्गवान् ॥

५०. पठितं गुणितं सर्वं आज्ञया सुन्दरं भवति ।
आज्ञारहितः धर्मः पलालपूल इव प्रतिभाति ॥

५१. हारितं सम्यक्त्वं श्रामण्यं नाशितं ध्रुवं तैः ।
परचित्तरञ्जनार्थं आज्ञाभङ्गः कृतो यैः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अष्टादश भक्ष्यभोजनानि**

५३. **सूपोदणं जवन्नं तिन्नि य मंसाइं गोरसो जूषो ।**
**भक्खा गुललावणिया मूलफला हरियकं डागो ॥५४॥**

५४. **होइ रसालुय तहा पाणं पाणी य पाणयं चेव ।**
**अट्ठारसमं सागं निरुवहओ लोइओ पिंडो ॥५५॥**

[टीका] सूपो मुद्गादीनाम् ।१। ओदनः कल्मशाल्यादीनाम् ।२। यवान्नं यवनिष्पन्नम् ।३। णी(त्री)णि मांसानि जलज-स्थलस्थ(ज)-खजोद्भवानि ।४-६। गोरसो दध्यादि ।७। जूषो मुद्गादिरसः ।८। भक्ष्याणि पक्वाइं ।९। गुललावणिका गुलपर्पटिका ।१०। मूलफलानि कंदा आदि ।११। हरिकं कुसुंभरपत्रादीनि ।१२। डाको(गो)वाइंगणादिः ।१३। रसालुय मज्जिकाशिखरिणी ।१४। पाणं मद्यपानादि ।१५। पानीयं तडागादिभवम् ।१६। पाणकं द्राक्षादिनादि ।१७। शाको वत्थुलादि ।१८। निरुपहतोऽबाधकः । लोकप्रसिद्धः पिण्ड आहारसमूह इति ॥

**दोधयपला महुपलं दहिस्स अद्धाढयं मिरिय वीसा ।**
**दसखंड-गुलपलाइं एय रसालू निवइजोग्गा ॥**
**धन्नाइं चउव्वीसं जव गोहुम सालि वीहिसट्ठियया ।**
**कुद्दव-आपूया-कंगू रालगतिल मुग्ग मासा य ॥**
**अइसि हिरिमित्थितिउडग निप्फाय सिलिंद राजमासा य ।**
**इखू-मसूर-तूयरि-कुलत्थ तह धन्नय कलाय एवं ॥२४॥**
**आपूय श्यामाकः हिरिमित्थि कृष्णचनकाः । सिलिंदा मकुष्ठाः । राजमासा चवलकाः । तह धन्नयं वेसणं । कलाया वृत्तचनकाः । शेषं सुगमम् ॥**

५५. **श( शा )स्त्रं सुनिश्चितधियाऽपि हि चिन्तनीयं,**
**आराधितोऽपि नृपतिः परिशङ्कनीयः ।**
**आत्मीकृतापि युवतिः परिरक्षणीया,**
**शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम् ? ॥५६॥**

५६. **जइ गेहं पइदियहं पि सोहियं तहय परव(पव्व)संधीसु ।**
**सोहिज्जइ सविसेसं एवं इहयं पि नायव्वं ॥५७॥**

---

५३. सूपोदनं यवान्नं त्रीणि मांसादि गोरसो यूषः ।
भक्ष्या गुललावणिका मूलफलानि हरितकं डाकः ॥

५४. भवति रसालुकं तथा पानं पानीयं पानकं चेव ।
अष्टादशं शाकं निरुपहतो लौकिकः पिण्डः ॥

५६. यदि गेहं प्रतिदिवसं अपि शोभितं तथा च पर्वसंधिषु ।
शोभिष्यते सविशेषं एव इहाऽपि ज्ञातव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५७. देवे द्विजे तथा शास्त्रे दैवज्ञे भैषजे गुरौ ।
यादृशी या(जा)यते भक्तिः सिद्धिर्भवति तादृशी ॥५८॥

५८. सर्वत्र मुखरचपलाः प्रभवन्ति[हि] साधु सम्मत्ता(ता) गुणिनः ।
तिष्ठन्ति तोयराशेरुपरि तरङ्गास्तले मणयः ॥५९॥

५९. गलगर्जि विनाप्युच्चैर्लभन्ते गुणिनः फलम् ।
न जल्पति मणिः किञ्चित् विक्रयं याति कोटिभिः ॥६०॥

६०. सुकविश्रमानभिज्ञे श्रोतरि वचनानि विफला(लतां) यान्ति ।
भर्त्तरि मुग्धे प्रौढप्रमदारतविलसितानीव ॥६१॥

६१. श्रुतरत्नमेव धार्यं यदि भवति विशुद्धवाग्गुणग्रथितम् ।
विकिरति यशांसि भुवने निधनेऽप्यनुयाति शाश्वतिकम् ॥६२॥

६२. किं कुर्मः किमुपालम्भे यत्रेदमसमञ्जसम् ।
काकिण्यपि न सिंहस्य मूल्यं कोटिश्च दन्तिनः ॥६३॥

६३. उद्युक्तस्याप्रमत्तस्य ह्यनागतविधायिनः ।
दिशो निरीक्षमाणस्य जाग्रतो नास्ति नुर्भयम् ॥६४॥

६४. जाई जयंमि गरुया जाईए तह य उत्तमा लच्छी ।
[लच्छी]ए गुणा गुरुया तिण्णिवि लहुया विवेगस्स ॥६५॥

६५. काश(स)श्वासातिसारो ज्वरपिटकपिटीकुष्ठकोष्ठप्रमो(मे)हान्
मूत्रग्राहोदरार्शःश्वयथुगलशिरःकर्णनासाक्षिरोगम् ।
ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जन्तो-
स्तानप्यभ्यासयोगादपनयति पयः पीतमन्ते निशायाः ॥६६॥

६६. या(ये) वर्धिताः करिकपोलमदेन भृङ्गाः प्रोत्फुल्लपङ्कजरजःसुरभीकृताङ्गाः ।
ते साम्प्रतं प्रतिदिनं गमयन्ति कालं निम्बेषु चाऽर्ककुसुमेषु च दैवयोगात्
॥६७॥

६७. अभिमानं धनं येषां चिरं जीवन्तु ते नराः ।
अभिमानेन दीनानां किं धनेन किमायुषा ? ॥६८॥

६८. धृतिभावनया दुःखं सत्त्वभावनया [रुषम्] ।
[तपोभावनया?] कर्म नाशं याति न संशयः ॥६९॥

---

६४. जातिः जगति गुर्वी जात्या तथा च उत्तमा लक्ष्मीः ।
लक्ष्म्या गुणाः गुरुकाः त्रयोऽपि लघुका विवेकस्य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६९. निजगुणगणसौभाग्यं परगुणपरिवर्णनेन कथयन्ति ।
सन्तो विचित्रचरिता नम्रतया चोन्नतिं यान्ति ॥६९॥

७०. उप(पा)येऽपि हि नोपकृतं स्वबन्धुवर्गस्य येन पुरुषेण ।
तस्य कुलजन्म विफलं जलवर्जितमेघरवतुल्यम् ॥७०॥

७१. ये शूराः समरे महाकविसभामध्येऽपि ये वाग्मिनो
ये मानैकधना मनोरमतया ये कामकीर्तिच्छिदः ।
तेऽप्याज्ञां शिरसा वहन्ति सततं तस्य प्रसन्नाननाः
यो लक्ष्म्या नवमीलनीरजदृशा विश्रब्धमालोकितः ॥७१॥

७२. तृणवद् गणयति जगदपि नीचो यत्किञ्चिदपि पदं प्राप्य ।
वृतिमारूढो दिनकरमुत्पश्यो हसति कृकलासः ॥७२॥

७३. पद्मिन्यो राजहंसाश्च जीमूताः सुतपस्विनः ।
यं देशमधितिष्ठन्ति स देशः श्रियमश्नुते ॥७३॥

७४. उदये कुरुष्व धीधन ! तथोपकारं जनस्य सकलस्य ।
प्रत्युपकाराय यथा मनोरथा हृदि विलीयन्ते ॥७४॥

७५. प्रारभते न हि सुजनस्त्रीवर्गशून्यं प्रयोजनं किमपि ।
प्रारब्धं तु कथञ्चित् प्राणकोटिं ध्रुवं नयति ॥७५॥

७६ सर्वेषामेव जन्तूनां वेश्या भवति दुःखिता ।
अस्तंगते दिवानाथे को मे भर्ता भविष्यति ॥७६॥

७७. सर्वनाशे समुत्पन्ने त्वर्द्धं त्यजति पण्डितः ।
अर्द्धेन कुरुते कार्यं सर्वनाशो हि दुस्तरः ॥७७॥

७८. ईप्सितं मनसा सर्वं कस्य सम्पद्यते सुखम् ।
दैवायत्तं जगत्सर्वं तस्मात्सन्तोषमाश्रयेत् ॥७८॥

७९. सन्तोषस्त्रिषु कर्त्तव्यः स्मरादौ भोजने धने ।
त्रिषु चैव न कर्त्तव्यः दानाध्ययनकर्मसु ॥७९॥

८०. असन्तुष्टा द्विजा नष्टाः सन्तोषेण तु पार्थिवाः ।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः ॥८०॥

८१. आलस्यं नारभेत प्राज्ञोऽकार्यं नैव चिन्तयेत् ।
अदृष्टं न तु प्रजल्पेदभक्ष्यं नैव भक्षयेत् ॥८१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८२. विनयं राजपुत्रेभ्यः पण्डितेभ्यः सुभाषितम् ।
अनृतं द्यूतकारेभ्यः स्त्रीभ्यः शिक्षेत कैतवम् ॥८२॥

८३. सद्भावो नास्ति वेश्यानां स्थिरता नास्ति सम्पदाम् ।
विवेको नास्ति मूर्खाणां विश्वासो नास्ति कर्मणाम् ॥८३॥

८४. षट्पदो पुष्पमध्यस्थो यथा सारं समुद्धरेत् ।
तथा सर्वेषु कार्येषु सारं गृह्णाति बुद्धिमान् ॥८४॥

८५. भोजनस्य घृतं सारं प्राणिनां नवयौवनम् ।
अर्थस्य दानसम्पत्तिर्वाचां सत्यं क्षमा प्रभोः ॥८५॥

८६. नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नाऽन्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥८६॥

८७. उद्यमादनिवृत्तस्य ससहायस्य धीमतः ।
छायेवाऽनुगता तस्य नित्यं श्रीः सहचारिणी ॥८७॥

८८. नात्यन्तमृदुना भाव्यं मृदुः सर्वत्र बाध्यते ।
निःसारां कदलीं दृष्ट्वा छेत्तुं को न समुद्यतः ॥८८॥

८९. भिक्षुर्विलासी नि(वि?)धनश्च कामी वृद्धो विटः प्रव्रजितश्च मूर्खः ।
वेश्याङ्गना रूपविलासहीना प्रजापतेर्दुश्चरितानि पञ्च ॥८९॥

९०. अनायके न स्थातव्यं सततं भूतिमिच्छता ।
स्त्रीनायकं परित्यज्य बालनायकसंयुतम् ॥९०॥

९१. अर्थातुराणां न सुहृन्न बन्धुः कामातुराणां न भयं न लज्जा ।
चिन्तातुराणां न सुखं न निद्रा क्षुधातुराणां न वपुर्न तेजः ॥९१॥

९२. पाण्डित्ये गणिते शिल्पे तथा सर्वकलासु च ।
धर्मार्थकाममोक्षेषु सर्वेषु कुशलो भवेत् ॥९२॥

९३. अनभ्यासे विषं शास्त्रमजीर्णे भोजनं विषम् ।
दरिद्रस्य विषं गोष्ठी वृद्धस्य तरुणी विषम् ॥९३॥

९४. देवताराधने दाने विद्याभ्यासे सदौषधे ।
क्षमायां परमो यत्नः कर्तव्यो विजिगीषुणा ॥९४॥

९५. दाने तपसि शौर्ये वा विज्ञाने विनये नये ।
विस्मयो हि न कर्तव्यो बहुरत्ना वसुन्धरा ॥९५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९६. अलसस्य कुतो विद्या निर्विद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रममित्रस्य कुतो बलम् ? ॥९६॥

९७. यस्य पुत्रा वशे नित्यं भार्या छन्दोनुवर्तिनी ।
विभवेष्वपि सन्तोषस्तस्य स्वर्ग इहैव च ॥९७॥

९८. सर्वेषामेव रत्नानां स्त्रीरत्नं [तु]मनोरमम् ।
तदर्थं धनमिच्छन्ति त[द्धि]त्यक्त्वा धनेन किम् ? ॥९८॥

९९. सुकुले योजयेत्कन्यां पुत्रे विद्यां नियोजयेत् ।
व्यसने योजयेच्छत्रुमिष्टं धर्मे नियोजयेत् ॥९९॥

१००. कृते प्रतिकृतं कुर्यात् हिंसिते प्रतिहिंसितम् ।
न तत्र दोषं पश्यामि यो दुष्टे दुष्टमाचरेत् ॥१००॥

१०१. नदीतीरेषु ये वृक्षा या च नारी निराश्रया ।
मन्त्रहीनाश्च राजानो न भवन्ति चिरायुषः ॥१०१॥

१०२. लिङ्गिनं च गुरुं गां च ब्राह्मणं नृपतिं स्त्रियम् ।
मूर्खं बालं च सर्वं च कोपयन्ति न पण्डिताः ॥१०२॥

१०३. कुमित्रे नास्ति विश्वासः कुभार्यायां कुतः सुखम् ।
कुराज्ये निर्वृतिर्नास्ति कुदेशे नास्ति जीवितम् ॥१०३॥

१०४. अभ्रच्छाया तृणादग्नि खले प्रीतिः स्थले जलम् ।
वेश्यारागः कुमित्रं च षडेते बुद्बुदोपमाः ॥१०४॥

१०५. राजा कुलवधूर्विप्रा नियोगी मन्त्रिणः स्तनौ ।
स्थानभ्रष्टा न शोभन्ते दन्ताः केशाः नखाः नराः ॥१०५॥

१०६. गुणेष्वादरः क्रियतां किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥१०६॥

१०७. गुणा यत्र न पूज्यन्ते का तत्र गुणिनां गतिः ।
नग्नक्षपणकग्रामे रजकः किं करिष्यति ॥१०७॥

१०८. अहो प्रकृतिसादृश्यं श्लेष्मणो दुर्जनस्य च ।
मधुरैः कोपमायाति कटुकैरुपशाम्यति ॥१०८॥

१०९. यथा गजपतिः श्रान्तश्छायार्थी वृक्षमाश्रितः ।
विश्रम्य तं द्रुमं हन्ति तथा नीचः स्वमाश्रयम् ॥१०९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११०. दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि हि ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥११०॥

१११. दुर्जनेनोच्यमानानि वा(व)चांसि मधुराण्यपि ।
अकालकुसुमानीव सन्त्रासं जनयन्ति मे ॥१११॥

११२. उपभोगकातराणामर्थसञ्चयपराणाम् ।
का(क)न्यारत्नमिव गृहे तिष्ठन्त्यर्थाः परस्यार्थे ॥११२॥

११३. सुरूपोऽहमिति ज्ञात्वा ताण्डवं कुरुते शिखी ।
नो जानाति स मन्दात्मा कौपीनं दृश्यते जनैः ॥११३॥

११४. एक एव खगो मानी सुखं जीवति चातकः ।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥११४॥

११५. गर्ज वा वर्ष वा मेघ मुञ्च वा शिततोमरान् ।
गणयन्ति न शीतोष्णं वल्लभाभिमुखाः स्त्रियः ॥११५॥

११६. उद्गम्योद्गम्य तेऽत्रैव दरिद्राणां मनोरथाः ।
पतन्ति हृदये व्यर्था विधवस्त्रीस्तना इव ॥११६॥

११७. तावद्भद्राः पुरुषा यावत् स्थानेषु स्थापिता [नृ?]पैः ।
रङ्गोत्तीर्णनटा इव नो दृश्या भूमिकारहिताः ॥११७॥

११८. यदि धनिनः सत्पुरुषा यदि च सुरूपाणि परकलत्राणि ।
अनुपचितसुकृतसंचय ! तव हृदय ! किमाकुलीभावः ? ॥११८॥

११९. वचनं वचनं हि केवलं प्रतिपत्तिस्तु गुणैर्विभाव्यते ।
वचनैरुपचात(र)कोमलैः फलहीने(नै)र्बत किं प्रयोजनम् ? ॥११९॥

१२०. न काष्ठे विद्यते देवो न शिलायां न च कर्दमे ।
भावेषु विद्यते देवस्तस्माद्भावं प्रशंसयेत् ॥१२०॥

१२१. यथा धेनुसहस्त्रेभ्यो वत्सो विन्दति मातरम् ।
तथा पूर्वं कृतं कर्म कर्तारमनुगच्छति ॥१२१॥

१२२. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥१२२॥

१२३. दानं भोगो नाशस्तिस्त्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥१२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१२४. अदृष्टमुखभङ्गस्य युक्तमन्थस्य याचितुम् ।
अहो बत महत्कष्टं चक्षुष्मानपि याचते ! ॥१२४॥

१२५. किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरपि भुज्यते ॥१२५॥

१२६. प्रधानता पदस्यैव पुरुषं प्रत्यनादरः ।
स्थापितः पूज्यते यक्षः पाषाणः पादघर्षणः ॥१२६॥

१२७. सुखशय्यासनं वस्त्रं ताम्बूलं स्नानधूपनम् ।
दन्तकाष्ठं सुगन्धं च ब्रह्मचर्यस्य दूषणम् ॥१२७॥

१२८. वातेन यदि च क्षीरं ममापि कुरु भद्रक ! ।
गोपालं प्रार्थयेन्नारी अर्थी दोषं न पश्यति ॥१२८॥

१२९. घटसर्पप्रभावेन भर्ता मे गृहमागतः ।
तस्मात्सर्वेषु कालेषु संग्रही नावसीदति ॥१२९॥

१३०. हेतुयुक्तं च पथ्यं च सत्यं साधुजनप्रियम् ।
यो हि वक्तुं न जानाति स जिह्वां किं न रक्षति ? ॥१३०॥

१३१. मुखदोषेण बध्यन्ते शुक-सारिक-तित्तिराः ।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥१३१॥

१३२. पटु रटति पलितदूतो मस्तकमासाद्य सर्वलोकस्य ।
परिभवति जरामरणं कुरु धर्मं विरम पापेभ्यः ॥१३२॥

१३३. मुखं वलिभिराक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥१३३॥

१३४. जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतु
शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥१३४॥

१३५. यदि वहति त्रिदण्डं नाग्न्य-मौण्डयं जटां वा,
यदि वसति गुहायां वृक्षमूले शिलायाम् ।
यदि पठति पुराणं वेदसिद्धान्ततत्त्वं
यदि हृदयमशुद्धं सर्वमेतन्न किञ्चित् ॥१३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१३६. धन्यास्त एव तरलायितलोचनानां कन्दर्पदर्पघनपीनपयोधराणाम् ।
क्षामोदरभ्रमितनाभिवलित्रयाणां दृष्ट्वाऽऽकृतिं विकृतिमेति मनो न येषाम्
॥१३६॥

१३७. हे दारिद्र्य ! नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
पश्याम्यहं जगत्सर्वं न मां पश्यन्ति केचन ॥१३७॥

१३८. यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुति(त)वान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते ॥१३८॥

१३९. धनवान् दुष्कुलीनोऽपि लोके सर्वत्र पूज्यते ।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥१३९॥

१४०. यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥१४०॥

१४१. वयोवृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रुताः ।
सर्वे ते धनवृद्धस्य द्वारे तिष्ठन्ति किंकराः ॥१४१॥

१४२. यस्य चित्तं द्रवीभूतं कृपया सर्वजन्तुषु ।
तस्य ज्ञानं च मोक्षश्च किं जटा-भस्म-चीवरैः ॥१४२॥

१४३. यदि मोक्षमभीप्ससि मूढमते ! मठकेन करिष्यसि किं नु यते ! ।
युवतीजनसंकुलके मठके क्व तपः क्व जपः क्व समाधिविधिः ? ॥१४३॥

१४४. विषया यस्या(स्य)नाच्छन्नाः क्रोधो नोपशमं गतः ।
संसारे नैव वैराग्यं प्रव्रज्या तस्य जीविका ॥१४४॥

१४५. भाग्यक्षयेण क्षीयन्ते नोपभोगेन सम्पदः ।
कूपोदकविधानेन किं न जानन्ति पण्डिताः ? ॥१४५॥

१४६. मज्जत्वम्भसि यातु मेरुशिखरे शत्रुं जयत्वावह(हवे?)
व(वा)णिज्यं कृषिसेवनादि सकलाः विद्यां कलाः शिक्षतु ।
आकाशं सकलं प्रयातु खगवत् कृत्वा प्रयत्नं परं
न(नाऽ)भाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥१४६॥

१४७. एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद् द्रव्यं यद्दत्त्वा निरी(ऋ)णी भवेत् ॥१४७॥

१४८. विधानविहिते मार्गे किं करिष्यन्ति पण्डिताः ? ।
पण्डितानां च मूर्खाणां विधानमनुवर्तते ॥१४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१४९. विधानविहितं कर्म यद्भ्रेनै(?)व निर्मितम् ।
न शक्यमन्यथाकर्तुं संहतैस्त्रिदशैरपि ॥१४९॥

१५०. कर्मायत्तं फलं पुंसां बुद्धिस्तदनुसारिणी ।
तथापि सुधियः कार्यं सुविचार्यैव कुर्वते ॥१५०॥

१५१. वर्णं सितं झटित( ति ) वीक्ष्य शिरोरुहाणां
स्थानं परं परिभवस्य तदेव पुंसाम् ।
आरोपितास्थिशकलं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरण्यः ( तरुण्यः ) ॥१५१॥

१५२. जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुः श्रोत्राणि जीर्यन्ति तृष्णैका निरुपद्रवा ॥१५२॥

१५३. वदनं दशनां(न)विहीनं गावो न परिस्फुटा गता शक्तिः ।
विगता चेन्द्रियवृत्तिः पुनरपि बाल्यं कृतं जरया ॥१५३॥

१५४. यममिव गृहीतदण्डं हरिमिव सगदं शशाङ्कमिव वक्रम् ।
शम्भुमिव विरूपाक्षं जरा करोत्यकृतपुण्यमपि ॥१५४॥

१५५. दानेन तिष्ठन्ति यशांसि लोके दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानात् [तस्मात् ?]सुदानं सततं प्रदेयम् ॥१५५॥

१५६. दानं ख्यातिकरं सदा हितकरं संसारसौख्याकरं
नृणां प्रीतिकरं गुणाकरकरं लक्ष्मीकरं किङ्करम् ।
स्वर्गायासकरं गतिक्षयकरं निर्वाणसम्पत्करं
वर्णायुर्बलबुद्धिवर्धम(न)करं दानं प्रदेयं बुधैः ॥१५६॥

१५७. दानेन भूतानि वशीभवन्ति दानेन कीर्त्यः प्रचरन्ति लोके ।
भवे भवे प्रार्जति सौख्यमक्षयं तस्मात् सुदानं सततं प्रदेयम् ॥१५७॥

१५८. शिथिलकटिकन्यालं लम्बितभ्रूललाटं
स्वरगतिपरिहीनं मन्दचक्षुर्घुलन्तम् ।
परिजनपरिभूतं यष्टिलग्नाग्रहस्तं
विकसितसितकेशं पश्य वृद्धं व्रजन्तम् ॥१५८॥

१५९. वीतरागेषु यद्दत्तं यद्दत्तं ब्रह्मचारिषु ।
सागरस्य भवेत्संख्या तस्य संख्या न विद्यते ॥१५९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६०. अशासितारं च गुरुं मन्दस्नेहं च भ्रातरम् ।
अदातारं च भर्तारं जनस्थानेषु स्थापयेत् ॥१६०॥

१६१. धनहीनो न हीनस्तु धनं वा कस्य निश्चलम् ।
विद्याहीनश्च यः कश्चित् स हीनः सर्ववस्तुषु ॥१६१॥

१६२. स जीवति गुणा यस्य यस्य धर्मः स जीवति ।
गुणधर्मविहीनस्य जीवतः किं प्रयोजनम् ॥१६२॥

१६३. नात्यन्तसरलैर्भाव्यं गत्वा पश्य वनस्पतीन् ।
सरलास्तत्र छिद्यन्ते कुब्जाः तिष्ठन्ति पादपाः ॥१६३॥

१६४. अधमा धनमिच्छन्ति धनमानं च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानं हि महतां धनम् ॥१६४॥

१६५. दुर्जनः प्रियवादी च नैव विश्वासकारणम् ।
मधुर्वं( व )सति जिह्वाग्रे हृदये( हृदि )हालाहलं विषम् ॥१६५॥

१६६. कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ॥१६६॥

१६७. हिंसामङ्गिषु मा कृथा वद गिरं सत्यां न पापावहां
स्तेयं वर्जय सर्न( र्व )था परवधूसङ्गं विमुञ्चादरात् ।
कुर्विच्छापरिमाणमिष्टविभवे क्रोधादिदोषांस्त्यज
प्रीतिं जैनमते विधेहि नितरां धर्मे यदीच्छास्ति ते ॥१६७॥

१६८. प्राणान्न हिंस्यान्न पिबेच्च मद्यं वदेच्च सत्यं न हरेत्परस्वम् ।
परस्य भार्यां मनसाऽपि नेच्छेत् स्वर्गं यदीच्छेद् गृहवद् प्रवेष्टुम् ॥१६८॥

१६९. क्षान्तिसमं तपो नास्ति सन्तोषान्न परं सुखम् ।
नास्ति विद्यासमं दानं नास्ति धर्मो दयासमः ॥१६९॥

१७०. यो धर्मशीलो जितमानरोषो विद्याविनीतो न परोपतापी ।
स्वदारतुष्टः परदारवर्जी न तस्य लोके भयमस्ति किञ्चित् ॥१७०॥

१७१. नाहारं चिन्तयेत् प्राज्ञो धर्ममेकं हि चिन्तयेत् ।
आहारो हि मनुष्याणां जन्मना सह जायते ॥१७१॥

१७२. दानेन भोगान् दयया च रूपं ध्यानेन मोक्षं तपसेष्टसिद्धिम् ।
सत्येन वाक्यं प्रशमेन पूजां वृत्तेन जन्माग्र्यमुपैति मर्त्यः ॥१७२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१७३. राज्यं च सम्पदो भोगाः कुले जन्म सुरूपता ।
पाण्डित्यमायुरारोग्यं धर्मस्यैतत्फलं विदुः ॥१७३॥

१७४. रणे वने शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥१७४॥

१७५. दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम् ।
अज्ञाननाशिनी प्रज्ञा भावना भवनाशिनी ॥१७५॥

१७६. क्रमेण शैलः सलिलेन भिद्यते क्रमेण वाल्मीकशिखाऽभिवर्धते ।
क्रमेण विद्या विनयेन गृह्यते क्रमेण मोक्षस्तपसाऽधिगम्यते ॥१७६॥

१७७. वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥१७७॥

१७८. त्यक्त्वा जीर्णमयं कायं लभते च नवं वपुः ।
संसारे कृतपुण्यस्य मृत्युरेव रसायनम् ॥१७८॥

१७९. नो दृष्टं भुवने शशाङ्कसदृशं शुद्धं जिनस्यालयं
नो शास्त्रं विदितं प्रबोधजनकं भव्याम्बुजानां प्रियम् ।
नो दत्तं मुनिपुङ्गवाय सततं दानं मया भक्तितः
कालोऽयं खलु याति पापमनसो नो साधितं किञ्चन ॥१७९॥

१८०. धर्मे मतिर्भवतु किं बहुना श्रुतेन जीवे दया भवतु किं बहुभिः प्रदानैः ।
शान्तं मनो भवतु किं कुजनैरतुष्टैरारोग्यमस्तु विभवेन चलेन किं वा ?
॥१८०॥

१८१. स धर्मो नास्ति नाधर्मस्तत्सुखं यत्र नाऽसुखम् ।
तज्ज्ञानं यत्र नाऽज्ञानं सा गतिर्यत्र नाऽऽगतिः ॥१८१॥

१८२. धर्मस्य कानि लिङ्गानि दमः क्षान्तिरहिंस्रता ।
तपो दानं च शीलं च योगो वैराग्यमेव च ॥१८२॥

१८३. क्षीयन्ते सर्वदानानि यज्ञ-होम-बलिक्रियाः ।
न क्षीयते महादानमभयं सर्वदेहिनाम् ॥१८३॥

१८४. मानो धनं करौ शस्त्रं सहायो यस्य पौरुषम् ।
चेतो मन्त्री गुणो वर्म स धात्राऽपि न जीयते ॥१८४॥

१८५. [वि?]नमत्युन्नतिहेतोर्जीवनहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ? ॥१८५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८६. महतां स्थानमाश्रित्य फलं पुण्यानुसारतः ।
श्रीकण्ठकण्ठलग्नोऽपि वासुकिर्मरुताशनः ॥१८६॥

१८७. चारुता परदाराय धनं लोकोपतप्तये ।
प्रभुत्वं साधुनाशाय खले खलतरा गुणाः ॥१८७॥

१८८. धर्मश्रुतेः पापमुपैति नाशं धर्मश्रुतेः पुण्यमुपैति वृद्धिम् ।
स्वर्गापवर्गप्रवरोरुसौख्यं धर्मश्रुतेरेव[न]चान्यतोऽपि ॥१८८॥

१८९. श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम् ।
श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षं च गच्छति ॥१८९॥

१९०. धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥१९०॥

१९१. धर्मे रागः श्रुते चिन्ता दाने व्यसनमुत्तमम् ।
इन्द्रियार्थेषु वैराग्यं संप्राप्तं जन्मनः फलम् ॥१९१॥

१९२. नृजन्मनः फलं सारं यदेव ज्ञानसेवनम् ।
अनिगूढस्य वीर्यस्य संयमस्य च धारणम् ॥१९२॥

१९३. विशुद्धं मानसं यस्य रागादिमलवर्जितम् ।
संसाराग्रफलं तस्य सकलं समुपस्थितम् ॥१९३॥

१९४. येषां न विद्या न तपो न दानं न चापि शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥१९४॥

१९५. पूजा नैव कृता जिनस्य कमलैः किंजल्कगन्धोत्कटैः
दानं नैव चतुर्विधं मुनिजने दत्तं मया भक्तितः ।
तप्तं नैव तपः सुचारुचरितं रत्नत्रयाराध[कं]
[हा !]कष्टं जननी मया प्रवसने (प्रसवने) दुःखेन संयोजितः(ता) ॥१९५॥

१९६. प्रव्रज्या न कृता विधानविहिता प्रोक्ता च जैने मते
पुष्पैश्चम्पक-कर्णिकार-बकुलैर्नाभ्यर्चितोऽयं जिनः ।
तत्त्वज्ञानमहासमुद्रतरणे नैवापि पारङ्गतः
कालोऽयं परपिण्डतर्कणपरैः काकैरिव प्रेरितः ॥१९६॥

१९७. सूत्रार्थी रत्नमालां दलति दहति वा चन्दनं भस्महो( हे )तोः
नावं वाऽसौ भिनत्ति स्वहितविरहितो लोहकीलं जिघृक्षुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्याप्यक्षं निधिं वा त्यजति जडमतिर्निन्द्यभिक्षाभिलाषी
सद्धर्मं यो न कुर्यादसुलभनृभवं प्राप्य कृच्छ्रात्सुखैषी ॥१९७॥

१९८. स्थाल्यां वैदूर्यमय्यां पचति तिलखलं चान्दनैरिन्धनोघैः ।
सौवर्णैर्लो( र्लां )गलाग्रैर्विलिखति धरणीमर्कतूलस्य हेतोः ।
छित्त्वा कर्पूरखण्डं धृतिमिह कुरुते कोद्रवाणां समन्तात्
प्राप्यैनां कर्मभूमीं न चरति मतिमान् यस्तपो मन्दभाग्यः ॥१९८॥

१९९. अधोऽधः पश्यतः कस्य महिमा नोपजायते ।
उपर्युपरि पश्यतः सर्व एव दरिद्रति ॥१९९॥

२००. तपसः शयनस्यापि राज्यस्य विभवस्य च ।
जीवितस्य हि सौमित्रे ! भोजनं प्रथमं फलम् ॥२००॥

२०१. निःस्पृहो नाधिकारी स्यात् नाऽकामी मण्डनप्रियः ।
नाऽविदग्धः प्रियं ब्रूयात् स्फुटवक्ता न वञ्चकः ॥२०१॥

२०२. अपमानं पुरस्कृत्य मानं कृत्वा च पृष्ठतः ।
स्वार्थं समुद्धरेत् प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥२०२॥

२०३. प्रभोः क्षान्ति स्त्रियां लज्जा शौर्यं शस्त्रोपजीविनाम् ।
विभूषणमिति प्राहुर्वैराग्यं च तपस्विनाम् ॥२०३॥

२०४. इह हसति सतालं कान्तया सार्धमेकः
पर इह हि सदुःखं रोदिति क्षामकण्ठः ।
ललितगतिरिहाऽन्यो नृत्यति प्रीतियोगा-
दिति विविधविचित्रो हन्त ! संसारमार्गः ॥२०४॥

२०५. आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धीकृतं
तस्यार्धस्य कदाचिदर्धमधिकं वृद्धत्व-बाल्ये गतम् ।
शेषं व्याधि-वियोग-रोगसहितैः सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ? ॥२०५॥

२०६. संघः सद्गुणसंघसंगतिगुरुः संघो जिनैर्वन्दितः
संघः शासनवृत्तिहेतुरसकृत् संघः सतां मुक्तिदः ।
तद्भक्त्या विहितं भुजार्जितधनैः संघस्य यैः पूजनं
किं तैर्नाम न पूजितं सुकृतिभिः किं किं न लब्धं फलम् ? ॥२०६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२०७ महिलानिगडं दत्त्वा न सन्तुष्टः प्रजापतिः ।
भूयोऽप्यपत्यरूपेण ददाति गलशृङ्खलाम् ॥२०७॥

२०८. स्वभावकठिनस्यास्य कृत्रिमां बिभ्रतो नतिम् ।
गुणोऽपि परहिंसायै चापस्य च खलस्य च ॥२०८॥

२०९. वक्रतां बिभ्रतो यस्य गुह्यमेव प्रकाशते ।
कथं स न समानः स्यात् पुच्छेन पिशुनः शुनः ? ॥२०९॥

२१०. न च हसति नाभ्यसूयति न परं परिभवति नाप्रियं वदति ।
नाक्षिप्य कथां कथयति लक्षणमेतत् कुलीनस्य ॥२१०॥

२११. कार्यार्थी भजते लोको न कश्चित् कस्यचित्प्रियः ।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥२११॥

२१२. मनो विशुद्धं पुरुषस्य तीर्थं वाक्संयमश्चेन्द्रियनिग्रहश्च ।
एतानि तीर्थानि शरीरजानि स्वर्गं च मोक्षं च निदर्शयन्ति ॥२१२॥

२१३. अदूषितं नास्ति खलेन किञ्चित् गुणद्विषा दोषसमुत्सुकेन ।
पतिव्रता यत्र करोति जारं सव्याधियोनीति खला वदन्ति ॥२१३॥

२१४. सूक्ष्मं जिनेन्द्रवचनं हेतुभिर्यन्न गृह्यते ।
आज्ञासिद्धं तु तद् ग्राह्यं नान्यथावादिनो जिनाः ॥२१४॥

२१५. परीक्षा सर्वशास्त्रेषु कर्तव्या च विचक्षणैः ।
न कुशास्त्रप्रणीतेन कर्तव्यं विषभक्षणम् ॥२१५॥

२१६. गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः ।
प्रासादशिखरारूढो न काको गरुडायते ॥२१६॥

२१७. केचिज्जनाः सकलमेव जगत्समस्तं
भर्तुं क(कु)टुम्बमपरे स्वकमात्रमन्ये ।
अस्मद्विधाः पुनरभ्या(भा)ग्यभुजङ्गदष्टाः
शक्ता भवन्ति न निजोदरपूरणेऽपि ॥२१७॥

२१८. संसारे त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
जडैरुपलखण्डेषु रत्नसंज्ञा प्रकीर्तिता ॥२१८॥

२१९. विषस्य विषयाणां च विदुरत्यन्तमन्तरम् ।
उपभुक्तं विषं हन्ति विषयाः स्मरणादपि ॥२१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२२०. वनेऽपि दोषाः प्रभवं[ति रागिणां गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागस्य गृहं तपोवनम् ॥२२०॥]

— x —

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्लोकानुक्रमणिका


| | | | |
|---|---|---|---|
| अत्यार्जवहृदयानां | १३ | आयुर्वर्षशतं | २०५ |
| अत्युद्दामशिखैर्नखै | ७ | आर्यजनवर्जिता | १२ |
| अदूषितं नास्ति | २१३ | आलस्यं त्यक्त | १५ |
| अदृष्टमुखभङ्गस्य | १२४ | आलस्यं नारभेत | ८१ |
| अधमा धनमिच्छन्ति | १६४ | आवर्जितेऽदातरि | १९ |
| अधोऽधः पश्यतः | १९९ | आसारोऽपि हि संसार | १८ |
| अनभ्यासे विषं | ९३ | इदं पुण्यमिदं | ३४ |
| अनायके न स्थातव्यं | ९० | इन्द्रियाणि पशु | ७९ |
| अन्नासक्तम्मि | ३२ | ईप्सितं मनसा सर्वं | ७८ |
| अनुक्ता अपि ते | ३१ | इह वसति सतालं | २०३ |
| अनुपहसितवृद्ध | ९ | उदये कुरुष्व | ७४ |
| अपमानं पुरस्कृत्य | २०२ | उद्गम्योद्गम्य ते | ११६ |
| अप्रकटीकृतशक्तिः | ४४ | उद्यमादनिवृत्तस्य | ८७ |
| अभिमानधनं येषां | ६७ | उद्युक्तस्याप्रमत्त | ६३ |
| अभ्रच्छाया तृणा | १०४ | उपभोगकातराणा | ११२ |
| अभ्यस्यतां प्रवचन | ४७ | उपायेऽपि नोपकृतं | ७० |
| अर्थातुराणां न | ९१ | एक एव खगो | ११४ |
| अलसस्य कुतो | ९६ | एकमप्यक्षरं यस्तु | १४७ |
| अवलेपो शुचेरप्य | २२,२४ | कपिलानां सहस्त्रं | ३८ |
| अशासितारं च | १६० | कर्मायत्तं फलं | १५० |
| असंतुष्टा द्विजा | ८० | क्रमेण शैलः सलिलेन | १७६ |
| अहिर्बिडालो जामाता | ४६ | कार्यार्थी भजते | २११ |
| अहो खलभुजङ्ग | २५ | काले कलौ राजनि | ३७ |
| अहो प्रकृतिसादृश्यं | १०८ | काशश्वासातिसारो | ६५ |
| आदानगर्वसंग्रह | ३९ | का श्रीः श्रोण्याम | ११ |
| आदाय वारि परितः | २० | किं कुर्मः किमुपा | ६२ |


---

**१२४.** रु.व. ५०३, **१९९.** सु.को. १६८७, **२५.** सू.र.को. ७१, **२०.** सु.को. १०४१-सु.व. ८९१-सू.मू. २७०१, **२०५.** वैराग्य, १०५, **११४.** सु.व. ६७४, **१५०.** नीति. ८९, **६३.** सू.र.को. ३०८.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं तया क्रियते १२५
किमिह कपालकम ३
कीरन्ति जाइं ३३
कुमित्रे नास्ति १०३
कृते प्रतिकृतं १००
कृपणेन समो १६६
केचिज्जना: सकल २१७
को देश: पन्थान १७
को वीरस्य मनस्वि ५
क्षान्तिसमं तपो १६९
क्षीयन्ते सर्वदानानि १८३
गर्ज वा वर्ष वा ११८
गलगर्जि विनाप्य ५९
गुणा यत्र न पूज्यन्ते १०७
गुणेष्वादर: क्रियतां १०६
गुणैरुत्तुङ्गतां याति २१६
घटसर्पप्रभावेन १२९
घृतादष्टगुणं ३५
चइऊण घरं ४९
चारुता परदाराय १८७
जइ गेहं पइदियहं ५६
जनन्या अपि नाख्येयं २६
जाई जयंमि गरुया ६४
जलबिन्दुनिपातेन १२२
जातिर्यातुं रसातलं १३४
जिनपूजा गुरौ भक्ति: ३०
जीर्यन्ति जीर्यत १५२
ज्ञानदर्शनचारित्र २३
तपस: शयन २००
त्यक्त्वा जीर्णमयं १७८
तानीन्द्रियाण्यविक १
तावद्भद्रा पुरुषा ११७
तृणवद् गणयति ७२
दानं ख्यातिकरं १५६
दानं भोगो नाश १२३
दाने तपसि शौर्ये ९५
दानेन तिष्ठन्ति १५५
दानेन भूतानि १५७
दानेन भोगान् १७२
दारिद्र्यनाशनं दानं १७५
दुर्जन: परिहर्तव्यो ११०
दुर्जन: प्रियवादी १६५
दुर्जनेनोच्यमानानि १११
देवताराधने विद्या ९४
देवे द्विजे तथा ५७
धनवान् दुष्कुलीनो १३९
धनहीनो न हीन १६१
धन्यास्त एव १२६
धर्मं चरत: साधो २९
धर्मश्रुते: पापमु १८८
धर्मस्य कानि लिङ्गानि १८२
धर्मे मतिर्भवतु १८०
धर्मे राग: श्रुते १९१
धर्मार्थकाममोक्षा १९०

---

**१६६.** सु.व. ४६८ – सू.र.को. ४०२, १ सू.र.हा. १७१.१ **२१६.** सू.र.को. ५०७, **१८७.** सू.र.को. ६९, **१३४.** नीति. ३९ – सू.मु. १२५.९ **१५२.** सू.र.हा. **१७५.**२ १. नीति. ४०, **११०.** नीति. ५३–सु.व. ३५५ सू.र.हा. ३२.२४ **१११.** सु.व. ३५८ –सू.र.को. ६६, सू.र.हा. ३२.१६. **१२६.** शृंगार. ४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| धृतिभावनया दुःखं | ६८ |
| न काष्ठे विद्यते | १२० |
| न गजैर्न वराहैः | ३६ |
| न च हसति नाभ्य | २१० |
| नदीतीरे ये वृक्षाः | १०१ |
| नमत्युन्नतिहेतोः | १८५ |
| न महतां स्थानमाश्रित्य | १८६ |
| नाग्निस्तृप्यति | ८६ |
| नात्यन्तमृदुना | ८८ |
| नात्यन्तसरलै | १६३ |
| नादृष्टं भुवने | १७९ |
| नाहारं चिन्तयेत् | १७१ |
| निजगुणगणसौभा | ६९ |
| निःस्पृहो नाधिकारी | २०१ |
| न्यायं पालयतां | ५२ |
| पटु रटति पलित | १३२ |
| पढियं सुणियं | ५० |
| पद्मिन्यो राजहंसा | ७३ |
| परीक्षा सर्वशास्त्रे | २१५ |
| पाण्डित्ये गणिते | ९२ |
| पूजा नैव कृता | १९५ |
| प्रधानतापदस्यैव | १२६ |
| प्रभो शान्तिः स्त्रियां | २०३ |
| प्रव्रज्या न कृता | १९६ |
| प्राणान्न हि हिंस्या | १६८ |
| प्रायेण हि यदपथ्यं | २४ |
| प्रारभते न हि सुजन | ७५ |
| भरहेरवयविदेह | ४८ |
| भवति च न भवति | १४ |
| भाग्यक्षयेण क्षीयन्ते | १४५ |
| भिक्षुर्विलासी | ८९ |
| भोजनस्य घृतं | ८५ |
| मज्जत्वम्भसि | १४६ |
| मनो विशुद्धं पुरु | ४३ |
| मनो विशुद्धं | २१२ |
| महिला निगडं दत्त्वा | २०७ |
| मानो धनं करौ | १८४ |
| मुखं वलिभिराक्रान्तं | १३३ |
| मुखदोषेण बध्यन्ते | १३१ |
| यज्जीव्यते क्षणाम | ६ |
| यत्सेवन्तो नरपति | २ |
| यथा गजपतिः | १०९ |
| यथा धेनुसहस्त्रे | १२१ |
| यदि जलेन विशुद्ध्य | ४२ |
| यदि धनिनः सत्पुरुषाः | ११८ |
| यदि मोक्षमभीप्ससि | १४३ |
| यदि वहति त्रिदण्डं | १३५ |
| यद् गायन्ति च | ४ |
| यममिव गृहीतदण्डं | १५४ |
| यस्य चित्तं द्रवीभूतं | १४२ |
| यस्य पुत्रा वशे | ९७ |
| यस्यार्थास्तस्य | १४० |
| यस्यास्ति वित्तं | १३८ |
| या वर्धिताः करि | ६६ |
| ये शूराः समरे | ७० |
| येषां न विद्या | १९४ |
| ये स्त्रीसंघोरुसंस्पृष्टां | ४१ |
| यो धर्मशीलो जिन | १७० |


८६. सू.र.हा. ५४.७, **१४६.** नीति. १०१, **१४०.** सु.व. २८१६, **९७.** सू.र.हा. १६३.४७ **१३८.** नीति. ४१, **१९४.** नीति. १३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| यो व्यसनेन व्यथते | १६ |
| रणे वने शत्रु | १७४ |
| राजा कुलवधूर्विप्रा | १०५ |
| राज्यं च सम्पदो | १७३ |
| लिङ्गिनं च गुरुं | १०१ |
| वक्रतां बिभ्रतो | २०९ |
| वचनं वचनं हि | ११९ |
| वदनं दशनविहीनं | १५३ |
| वनेऽपि दोषाः | २२० |
| वयोवृद्धास्तपोवृद्धा | १४१ |
| वरं पर्वतदुर्गेषु | १७७ |
| वर्णं सितं झटिति | १५१ |
| वातेन यदि च क्षीरं | १२८ |
| विदग्धोऽपि सुवृत्तो | ८ |
| विधानविहितं कर्म | १४८ |
| विधानविहिते मार्गे | १४९ |
| विनयं राजपुत्रेभ्यः | ८२ |
| विशुद्धं मानसं | १९३ |
| विषया यस्या नाच्छन्नाः | १४४ |
| विषयी विषयविमुक्तं | २८ |
| विषयी विषयासक्तं | २७ |
| विषस्य विषयाणां | २१९ |
| वीतरागेषु यद्दत्तं | १५९ |
| शास्त्रं सुनिश्चित | ५५ |
| शिथिलकटिकपालं | १५८ |
| श्रुतरत्नमेव धार्यं | ६१ |
| श्रुत्वा धर्मं विजानाति | १८८ |
| षट्पदः पुष्पमध्यस्थो | ८४ |
| संसारे त्रीणि रत्नानि | २१८ |
| संघः सद्गुणसंघ | २०६ |
| स जीवति गुणा | १६२ |
| सन्तोषस्त्रिषु कर्तव्यः | ७९ |
| सद्भावो नास्ति वेश्या | ८३ |
| स धर्मो नास्ति | १८१ |
| सर्वत्र मुखरचपलाः | ५८ |
| सर्वनाशे समुत्पन्ने | ७७ |
| सर्वस्य हि मनो | ४५ |
| सर्वेषामेव जन्तूनां | ७६ |
| सर्वेषामेव रत्नानाम् | ९८ |
| सुकविश्रमानभिज्ञे | ६० |
| सुकुले योजयेत् | ९९ |
| सुखशय्यासनं | १२७ |
| सुरूपोऽहमिति ज्ञात्वा | ११३ |
| सूक्ष्मं जिनेन्द्र | २१४ |
| सूयोदणं जवन्नं | ५३ |
| सूत्रार्थी रत्नमालां | १९७ |
| स्थानप्रच्युतिरुन्नतिं | १० |
| स्थाल्यां वैदूर्य | १९८ |
| स्पृश्या न न बत | २१ |
| स्वभावकठिनस्य | २०८ |
| हारवियं सम्मत्तं | ५१ |
| हिंसामङ्गिषु मा कृथा | १६७ |
| हेतुयुक्तं च पथ्यं | १३० |
| हे दारिद्र्य नमस्तुभ्यं | १३७ |
| होइ रसालुय जहा | ५५ |


---

१७७. नीति. १४, २२०. सू.र.हा, १९६.२०. १९८. नीति. १००-सु.व. २०४५, २०८. सू.मु.८.७, १३७. सू.र.हा.१७६. १३ २१९. सू.र.हा. १९६.३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# छन्दःसूची

| | | |
|---|---|---|
| अनुष्टुप् | ८, १५, १७, १८, २२, २३, २५, २६, ३०, ३१, ३४, ३५, ३६, ३८, ४०, ४१, ४५, ४६, ५७, ५९, ६२, ६३, ६७, ६८, ७३, ७६-८८, ९०, ९२-११६, १२०-१२२, १२४-१३१, १३३, १३७, १३९-१४२, १४४, १४५, १४७-१५०, १५२, १५९-१६६, १६९, १७१, १७३, १७५, १७७, १७८, १८१-१८७, १८९ -१९३, १९९-२०३, २०७-२०९, २११, २१४-२१६, २१८, २१९. | १२९ |
| आर्या | ३, ९, १२-१४, १६, १९, २४, २७, २८, २९, ३२, ३३, ३९, ४२, ४४, ४८-५१, ५३, ५४, ५६, ५७, ६०, ६१, ६४, ६९, ७०, ७२, ७४, ७५, ११७, ११९, १२३, १३२, १५३, १५४, २१० | ३९ |
| इन्द्रवज्रा- | ९१, १७२, १८८, १९४ | ४ |
| उपजाति | ४४, ८९, १३८, १५५, १५७, १६८, १७०, १७४, २१२, २१३. | १० |
| उपेन्द्रज्रा: | ११८ | १ |
| ताटक | १४३ | १ |
| मन्दाक्रान्ता | २ | १ |
| मालिनी | १३५, १५८, २०४ | ३ |
| वंशस्थविल | १७६, २२० | २ |
| वसंततिलका | १, ६, २०, ३७, ४७, ५५, ६६, १३६, १५१, १८०, २१७. | ११ |
| शार्दूलविक्रीडित | ४, ५, ७, १०, २२, ५२, ७१, १३४, १४६, १५६, १६७, १७९, १९५, १९६, २०५, २०६. | १६ |
| स्रग्धरा | ११, ६५, १९७, १९८ | ४ |
| | | २२० |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सूक्तावली (लघु)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सूक्तावली

१. 'कोऽयं नाथ ?, जिनो, भवेत्तव वशी, नैवं प्रतापी प्रिये !,
हुंहुं तर्हि ............... शौर्यावलेपक्रियाम् ।
मोहोऽनेन विनिर्जितः प्रभुरसौ, तत्किङ्कराः के?, वयं,
इत्थं यो रति-कामजल्पविषयः सोऽयं जिनः पातु वः ॥१॥

२. अपायाः प्रतिपद्य[न्ते]पुण्यभाजामुपायताम् ।
सदा प्रसुवतेऽकस्माद्विपदोऽपि हि सम्पदः ॥२॥

३. विद्युद्द्योतैरिवाऽपुण्यैराश्लिष्टाः पुष्पिता अपि ।
भवन्ति निष्फलाः पुंसामाशाश्चूतलता इव ॥३॥

४. मध्येराजसभं महाजनसभामध्ये वणिग्मन्दिरे
मान्यानां सदने धनाधिपगृहे हर्म्ये तथा मन्त्रिणाम् ।
विप्राणां श्रमणाश्रमेऽमलधियां मध्ये परेषामपि
पूज्याः शीलयुजो भवन्ति मनुजाः सर्वत्र [देवाः]इव ॥४॥

५. किं किं नोपकृतं तेन किं न दत्तं महात्मना ।
प्रियं प्रसन्नवदनेन प्रथमं येन भाषितम् ॥५॥

६. सकृदपि गुणाय महतां महदपि दोषाय दोषिणां सुकृतम् ।
तृणमपि दुग्धाय गवां दुग्धमपि विषाय सर्पाणाम् ॥६॥

७. उपभोगोऽपायपरो वाञ्छति यः शमयितुं विषयतृष्णाम् ।
धावत्याक्रमितुमसौ पुरोऽपराह्ले निजच्छायाम् ॥७॥

८. आत्मा सर्वगतो यदि प्रियतमाविश्लेषदुःखाङ्कितो
नित्यश्चेद्विरहज्वरेण महता किं नीयते विक्रियाम् ।
प्रागासीद् यदि सक्रियोऽयमधुना[किं]निष्क्रियत्वं गतः
प्रायो भाग्यविपर्यये मयि मुधा सिद्धान्तसिद्धान्यपि ॥८॥

९. यातु क्वाऽपि तव स्वान्तं कान्ते ! कार्यं त्वया मम ।
यदेवाऽर्थक्रियाकारि तदेव परमार्थसत् ॥९॥

१०. अपि चण्डानलोद्धूततरङ्गस्य महोदधेः ।
शक्यते प्रसरो रोद्धुं नाऽनुरक्तस्य चेतसः ॥१०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११. अस्माकं बत मण्डले प्रथमतः पत्या करः पात्यते
काञ्ची-कुन्तलदेश-मध्यविषयान् हित्वा समिद्धश्रियः ।
ज्ञात्वेतीव पयोधरौ मृगदृशो जातो विकृष्टाननौ
नो नीचोऽपि पराभवं विषहते किन्तून्नतौ तादृशौ ॥११॥

१२. कुतस्तस्यास्ति राज्यश्रीः कुतः सन्ति मृगेक्षणाः ।
यस्य शूरं विनीतं च मित्रं नास्ति विनिश्चितम् ॥१२॥

१३. यदिन्दोर्जातेयं कथमपि लघुर्लक्ष्मकणिका
विधातुर्दोषोऽयं न तु गणनिधेस्तस्य किमपि ।
स किं पुत्रो नाऽत्रेर्न किमु [ग्र?]हचूडामणिरसौ
न किं हन्ति ध्वान्तं जगदुपरि किं वा न वसति ॥१३॥

१४. यदिन्दोरन्वेति प्रलयमुदयं वा निधिरपा-
मुपाधिस्तत्राऽयं भवति जनिकर्तुः प्रकृतितः ।
अयं कः सम्बन्धो यदनुहरते तस्य कुमुदं
विशुद्धाः शुद्धानां ध्रुवमनभिसन्धिप्रणयिनः ॥१४॥

१५. यदिह क्रियते कर्म तत्परत्रोपतिष्ठति ।
मूलसिक्तेषु वृक्षेषु फलं शाखासु जायते ॥१५॥

१६. क्षिपत्वग्नौ दत्तं जलमथ पयोदे पतिरपा-
मपेक्षन्तेऽर्थित्वं न तु गुणमुदारप्रकृतयः ।
इदं चिन्त्यं किन्तु क्व च विनिहितं भस्म भवति
क्व च न्यस्तं स्वस्ति प्रदिशति समस्तस्य जगतः ॥१६॥

१७. वचनमात्रेण माधुर्यं मयूर ! तव जृम्भते ।
उरगग्रसननिस्त्रिंशकर्मभिर्दारुणो भवान् ॥१७॥

१८. महता पुण्यपण्येन क्रीतेयं कापि नौस्त्वया ।
पारं दुःखोदधेर्गन्तुं त्वर यावन्न भिद्यते ॥१८॥

१९. अत्यार्यमतिदातारमतिशूरमतिव्रतम् ।
प्रज्ञाभिमानिनं चैव श्रीर्भयान्नोपसर्पति ॥१९॥

२०. नाऽऽस्ते मालिन्यभीतेः सकलगुणगणः संनिधानेऽपि येषां
येषां सन्तोषपोषः सततमपि सतां दूषणोद्घोषणेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषामाशीविषा[णा]मिव सकलजगन्निर्निमित्ताहितानां
कर्णे कर्णेजपानां विषमिव वचनं कः सकर्णः करोति ॥२०॥

२१. लक्ष्मीभ्रष्टोऽपि दैवादुदितविपदपि स्पष्टदृष्टान्यदोषो-
प्यज्ञावज्ञाहतोऽपि क्षयभृदपि खलालीकवाक्याकुलोऽपि ।
नैव त्यक्त्वाऽऽर्यचर्यां कथमपि सहजां सज्जनोऽसज्जनः स्यात्
किं कुम्भः शातकौम्भः कथमपि भवति त्रापुषो जातुको वा ॥२१॥

२२. गुणवानिति प्रसिद्धिः संनिहितैरेव भवति गुणवद्भिः ।
ख्यातो मधुर्जगत्यपि सुमनोभिः सुरभिभिः सुरभिः ॥२२॥

२३. शिष्टाचार इति (इतीव) विघ्नविहिते शास्तुः प्रमाणीकृतं
शास्त्र स्यादिति संनिरोध इति वा विघ्नस्य सम्पद्यताम् ।
शास्त्रादौ कृतबुद्धयो विदधते येनेष्टदेवस्तुतिं
तेनेत्थं भगवानपि प्रववृते प्रज्ञाधनोऽयं कविः ॥२३॥

२४. अर्हन् हरो हरिरनादिरनाहतश्च बुद्धो बुधो निरवधिर्विधिरव्ययश्च ।
इत्याद्यनेकविधनिर्मलनामधेयं शुद्धाशयः परमहंसमहं नमामि ॥२४॥

२५. तत्पाण्डित्यं न पतति पुनर्येन संसारचक्रे
सा सम्प्रीतिर्न पतति पुनर्या कृते वाऽकृते वा ।
ते किं भोगा रतिषु विदुषां ये न वाच्याः परेषां
तत्कर्तव्यं किमिह बहुना येन भूयो न भूयः ॥२५॥

२६. तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे देवे रागद्वेषमोहादिमुक्ते ।
साधौ सर्वग्रन्थसन्दर्भहीने संवेगोऽसौ निश्चलो योऽनुरागः ॥२६॥

२७. अजानन् दाहात्म्यं पतति शलभस्तत्र दहने
न मीनोऽपि ज्ञात्वा बत बडिशमश्नाति पिशितम् ।
विजानन्तो ह्येते वयमिह विपज्जालजटिलान्
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥२७॥

२८. यत्कृष्णानि दिशां मुखानि तनुषे यद्गर्जसि प्रोषित-
स्त्रीचेतांसि दधासि यद्भयभरं भूयस्तडिद्विभ्रमैः ।
एतद्वारिद ! बाह्यमेव भवतो मध्ये तु नैसर्गिकं
तत्पुष्यत्यमृतं यदत्र जगतां जीवातवे जायते ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२९. नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगाः
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किमममैः किं च विधिना
नमः सत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥२९॥

३०. धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः
सौभाग्यार्थिषु तत्प्रदः किमपरं पुत्रार्थिनां पुत्रदः ।
राज्यार्थिष्वपि राज्यदः किमथवा नानाविकल्पैर्नृणां
तत्किं यन्न ददाति ? किं च तनुते स्वर्गापवर्गावपि ॥३०॥

३१. न राज्ञामाज्ञाऽत्र प्रभवति परत्र प्रतिकृतौ
न पुत्रो मित्रं वा भवति न कलत्रं न सुजनः ।
न पत्तिर्वित्तं वा बहुभिरथवा किं प्रलपितैः
सहायः संसारे [भवति?]जिनधर्म : परमिह ॥३१॥

३२. मार्गे लोकः कति[पय]पदक्षेपसाध्ये पुरस्तात्
निर्वाहो मे कथमिति भवेच्चिन्तया व्यग्रचित्तः ।
संसाराख्ये पुनरिह पथि प्रत्यहं लङ्घनीये
निःसीमेऽस्मिन् किमिति कुधियः सुस्थिताः सञ्चरन्ति ॥३२॥

३३. भवति सुभगमूर्तिः खेचरश्चक्रवर्ती धनपतिरवनीशो वासुदेवो विपश्चित् ।
किमिह बहुभिरुक्तैर्लभ्यते सर्वमेको निरवधिभववार्द्धौ दुर्लभो जैनधर्मः
॥३३॥

३४. सभा केयं कोऽहं क इह समयः संप्रति वचः
प्रियं किं सर्वेषां सफलमिदमाहोस्विदफलम् ।
इति प्रेक्षापूर्वं निगदति न यश्चारुवचनं
स यद्वादी मूढो व्रजति निपुणं हास्यपदवीम् ॥३४॥

३५. माता पिता कलाचार्य एतेषां ज्ञातयस्तथा ।
वृद्धा धर्मोपदेष्टारो गुरुवर्गः सतां मतः ॥३५॥

३६. पूजनं चाऽस्य विज्ञेयं त्रिसन्ध्यं नमनक्रिया ।
तस्याऽनवसरेऽप्युच्चैश्चेतस्यारोपितस्य तु ॥३६॥

३७. अल्पस्थानादियोगश्च तदन्ते निभृतासनम् ।
नामग्रहश्च नाऽस्थाने नाऽवर्णश्रवणं क्वचित् ॥३७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३८. साराणां च यथाशक्ति वस्त्रादीनां निवेदनम् ।
परलोकक्रियाणां च कारणं तेन सर्वदा ॥३८॥

३९. त्यागश्च तदनिष्टानां तदिष्टेषु प्रवर्तनम् ।
औचित्येन त्विदं ज्ञेयमाहुर्धर्माद्यपीडया ॥३९॥

४०. तदासनाद्यभोगश्च तीर्थे तद्वित्तयोजनम् ।
तद्बिम्बन्यास-संस्कार ऊर्ध्वदेहक्रिया परा ॥४०॥

४१. समुचितधर्मसमाहितमनुचितपरिहारपूतमुचितज्ञम् ।
सविनयमविप्रतारकमिति धर्मार्थी गुरुं वदति ।

४२. विना गुरुभ्यो गुणनीरधिभ्यो जानाति धर्मं न विचक्षणोऽपि ।
निरीक्षते कुत्र पदार्थसार्थं विना प्रकाशं शुभलोचनोऽपि ॥४२॥

४३. ........................
................ति विषयवारितगतिः ।
बके चान्द्रः सर्वो गुणसमुदयः किञ्चिदधिको
गुणाः स्थाने मान्या नरवर ! न हि स्थानरहिताः ॥५०॥

५१. ये काकिणीमपि महापणहिण्डमान-
रण्डाकरण्डशरणां न गुणा लभन्ते ।
ते बन्धकोविदकुविन्त(न्द)करारविन्द-
मैत्रीमवाप्य नृपतीनपि लोभयन्ति ॥५१॥

५२. यत्पयोधरभारेषु मौक्तिकैर्निहितं पदम् ।
तत्प्रच्छादितरन्ध्राणां [गुणाना]मेव चेष्टितम् ॥५२॥

५३. गुणेष्वादरः कार्यो न वित्तेषु कदाचन ।
सुलभं गुणिनां द्रव्यं दुर्लभा धनिनां गुणाः ॥५३॥

५४. गुणिनि गुणज्ञो रमते नाऽगुणशीलस्य गुणिनि परितोषः ।
अलिरेति वनात्कमलं न दर्दुरास्त्वेकवासेऽपि ॥५४॥

५५. वद भो भट ! किं कुर्मः कर्मणां गतिरीदृशी ।
दुषिधातोरिवाऽस्माकं गुणो दोषाय जायते ॥५५॥

५६. उत्पतति पतति तिष्ठति भूमौ परिलुठति खनति चाऽऽधारम् ।
कर्दमकूपे घटकः सगुणोऽपि न पूरयत्युदरम् ॥५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५७. जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुः श्रोत्राणि जीर्यन्ति तृष्णैका तरुणायते ॥५७॥

५८. दुःखं दुष्कृतसंक्षयाय महतां क्षान्तेः पदं वैरिणः
कायस्याऽशुचिता विरागपदवी संवेगहेतुर्जरा ।
सर्वत्यागमहोत्सवाय मरणं जातिः सुहृत्प्रीतये
सम्पद्भिः परिपूरितं जगदिदं स्थानं विपत्तेः कुतः ? ॥५८॥

५९. प्राणा मृत्युभयेन यौवनमिदं वृद्धत्वदोषाहतं
इष्टानिष्टवियोगसङ्गमहादुःखैः सुखं पीडितम् ।
एवं नाऽत्र सुखं तथाऽपि विरसे संसारनिम्बद्रुमे
जीवो धर्मरसानभिज्ञहृदयस्तस्मिन् पुनर्धावति ॥५९॥

६०. रहितं महता शोचति रहयति महिमा न जातु कृतमनसः ।
शोचतु जगदात्मानं यत्रैव रविर्दिनं तत्र ॥६०॥

६१. यथा चतुर्भिः कनकं परीक्ष्यते निर्घर्षण-च्छेदन-ताप-ताडनैः ।
तथैव धर्मो विदुषा परीक्ष्यते श्रुतेन शीलेन तपो-दयागुणैः ॥६१॥

६२. य एते शृङ्गाग्रस्थितहरितवृक्षाः शिखरिणः
श्रवन्त्यो याश्चैताः प्रचुरसलिलव्याप्तवसुधाः ।
यदन्यद्वा किञ्चिच्चिरमचिरमप्यस्ति भुवने
दिनैः कैश्चिद् यातैस्तदिह खलु सर्वं न भविता ॥६२॥

६३. शुश्रूषमृ(स्व?)सुधर्ममाप्तगदितं मध्यस्थबुद्ध्या त्वमुं
मीमांसस्व गुरून्नमस्कुरु कुरुष्वाऽतुच्छमच्छं मनः ।
सद्दानं स तु वाञ्छितं ननु सतां तत्त्वं मनुष्व स्फुटं
दाक्ष(क्षि)ण्यं भज सज्जनान् सज यज श्रेयस्यघौघं त्यज ॥६३॥

६४. फलान्वितोधर्मयशोऽर्थनाशनः( ? ) भवेदपार्थः स्वशरीरतापनः ।
न चेह नाऽमुत्र हिताय यः सतां मनांसि कोपः स समाश्रयेत्कथम् ॥६४॥

६५. मुच्यते बन्धनाद् वृन्तं वृन्तात्पुष्पं प्रमुच्यते ।
क्लिश्यमानोऽपि दुष्पुत्रैः पिता स्नेहं न मुञ्चति ॥६५॥

६६. अने(अन्ये)भ्यः स्वेच्छया दद्यात् प्राणान् प्राणी जयं पुनः ।
नाऽपि पुत्राय शिष्याय गुरवे प्रतिवादिने ॥६६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६७. तापं स्तम्बेरमस्य प्रकट[ य ]ति करः शीकरैः कुक्षिमुक्षन्
पङ्कांकम्पस्तनां वहति तटतूलपुणपण्याङ्गनादिभि ( ? ) ।।६७।।

६८. स्त्रीमुद्रां झषकेतनस्य महतीं सर्वार्थसम्पत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्या [फला]न्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मण्डिताः
केचित्पञ्चशिखीकृताश्च जटिनः कापालिकाश्चाऽपरे ।।६८।।

६९. वचनीयमेव मरणं भवति कुलीनस्य लोकमध्येऽस्मिन् ।
मरणं कालपरिणतिरियं तु जगतोऽपि सामान्यम् ।।६९।।

[ एतावदेव ] ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्लोकानुक्रमणिका

| | | | |
|---|---|---|---|
| अजानन् दाहात्म्यं | २७ | नाऽऽस्ते मालिन्यभीतेः | २० |
| अत्यार्यमति | १९ | पूजनं चास्य विज्ञेयं | ३६ |
| अन्येभ्यः स्वेच्छया | ६६ | प्राणा मृत्युभयेन | ५९ |
| अपायाः प्रतिपद्य | २ | फलान्वितो धर्मः | ६४ |
| अपि चण्डानलोद्भूत | १० | भवति सुभगमूर्तिः | ३३ |
| अर्हन् हरो हरि | २४ | मध्येराजसभं | ४ |
| अल्पस्थानादियोगश्च | ३७ | महता पुण्यपण्येन | १८ |
| अस्माकं बत मण्डले | ११ | माता पिता कलाचार्य | ३५ |
| आत्मा सर्वगतो | ८ | मार्गे लोकः कतिपय | ३२ |
| उत्पतति पतति | ५६ | मुच्यते बन्धनाद् वृन्तं | ६५ |
| उपभोगोऽपायपरो | ७ | य एते शृङ्गाग्र | ६२ |
| किं किं नोपकृतं | ५ | यत्कृष्णानि दिशां | २८ |
| कुतस्तस्यास्ति | १२ | यत्पयोधरभारेषु | ५२ |
| कोऽयं नाथ जिनो | १ | यत्पाण्डित्यं न पतति | २५ |
| क्षिपत्वग्नौ दत्तं | १६ | यथा चतुर्भिः कनकं | ६१ |
| गुणवानिति प्रसिद्धः | २२ | यदिन्दोरन्वेति | १४ |
| गुणिनि गुणज्ञो | ५४ | यदिन्दोर्जातोऽयं | १३ |
| गुणेष्वादरः कार्यो | ५३ | यदिह क्रियते कर्म | १५ |
| जीर्यन्ति जीर्यतः | ५७ | यातु क्वापि तव | ९ |
| तथ्ये धर्मे ध्वस्तः | २६ | ये काकिणीमपि | ५१ |
| तदासनाद्यभोगश्च | ४० | रहितं महता | ६० |
| तापं स्तम्बेरमस्य | ६७ | लक्ष्मीभ्रष्टोऽपि | २१ |
| त्यागश्च तदनिष्ठा | ३९ | वचनमात्रेण माधुर्यं | १७ |
| दुःखं दुष्कृतसंक्षयाय | ५८ | वचनीयमेव मरणं | ६९ |
| धर्मोऽयं धनवल्लभेषु | ३४ | वद भो भट ! किं कुर्मः | ५५ |
| नमस्यामो देवान्ननु | २९ | विद्युद्द्योतैरिव | ३ |
| न राज्ञामाज्ञाऽत्र | ३१ | विना गुरुभ्यो गुण | ४२ |

२७.सू.मु. १३१/७३ । १९. सु.व. २६४६, सु.र.हा. १६७/२ । ५४. शा.प. २९३ । ५७. सू.र.हा. १७५/२ । २९. सु.व. ३०७९.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| शिष्टाचार इतीव | २३ | समुचितधर्म | ४१ |
| शुश्रूषस्व धर्ममा | ६३ | साराणां च यथाशक्ति ३८ | |
| सकृदपि गुणाय | ६ | स्त्रीमुद्रां झषकेतनस्य | ६८ |
| सभा केऽयं कोऽहं | ३४ | | |

# छन्दःसूची

| | | |
|---|---|---|
| अनुष्टुप् | २, ३, ५, ९, १०, १२, १५, १७, १८, १९, ३५, ३६, ३७, ३८, ३९, ४०, ५२, ५३, ५५, ६५, ६६ | २१ |
| आर्या | ६, ७, २२, २३, ४१, ५४, ५६, ५७, ६०, ६९ | १० |
| इन्द्रवज्रा | २६ | १ |
| उपेन्द्रवज्रा | ४२ | १ |
| मन्दाक्रान्ता | २५, २ | २ |
| मालिनी | ३३ | १ |
| वसंततिलका | २४, ५१ | २ |
| वंशस्थविल | ६१, ६२, ६४ | ३ |
| शार्दूलविक्रीडित | १, ४, ८, ११, २८, ३०, ५८, ५९, ६३, ६८ | १० |
| शिखरिणी | १३, १४, १६, २७, २९, ३१, ३४ (५०) | ८ |
| स्रग्धरा | २०, २१, ६७ | ३ |
| | | ६२ |
| अवाच्य | ४२-४७ | ७ |
| | | ६९ |

---

६८. शृंगार ५९.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org